TO

THE HONORABLE SIR ASHLEY EDEN

K. C. S. I., C. I. E.,

LIEUTENANT GOVERNOR OF BENGAL

&c &c &c

Digitized by Google

THE
UNIVERSITY
OF CHICAGO
LIBRARY

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

25-

93136

Digitized by Google



Digitized by Google



Digitized by Google

Digitized by Google

ईडनचरितम्

कविरत्नोपाख्येन

श्रीमता नारायणचन्द्र भट्टाचार्य्येण

प्रणीतम् ।



A Memoir of the Honourable

SIR ASHLEY EDEN, K. C. S. I., C. I. E.

LIEUTENANT-GOVERNOR

OF

BENGAL

In Sanskrit verse

BY

NARAYANA CHANDRA KAVIRATNA BHATTACHARYYA.

CALCUTTA:

H. M. MOOKERJEA & Co.

1882.

Digitized by Google

PK
3971
1

Printed and Published by H. M. Mookerjea & Co.,
At the "Metropolitan Press," 42, Zig-Zag Lane.
Calcutta.



SOC / Hall S

Digitized by Google

निखिलजनमाननिधान

महामहिम राजश्री राजेन्द्रनारायण

देव बाहादुर महोदय !

राजन् !

वर्द्धमानमिदं मनस्विनः,

ज्ञातवृद्धा समुपायनीकृतम् ।

पण्डितेष्ट-सवेद्यतो हि ते,

ग्रन्थिग्राम्य-शुभार्थसाधिनः ॥

श्रीनारायणचन्द्रशर्म्मणा ।

Digitized by Google

Digitized by Google

To

THE RÁJÁ RÁJENDRA NÁRÁYANA

DEVA BAHÁDUR.

SIR,

AT your suggestion, I have published this work in which I have tried to give expression to the sentiments of respect, esteem and gratitude which I, in common with most of my observant countrymen, entertain towards the noble subject of this memoir. I have used the Sanskrit language, because my ideas can best find utterance in this language and because it is not only the *lengua franca* of the learned of India but it is fast becoming so, of the savants all over the world.

With the utmost propriety I now take the liberty to dedicate this result of my labor of love to you who zealously stimulated it, and whose appreciation I highly value.

With my hearty blessings,

I RESPECTFULLY REMAIN,

Your sincere wellwisher,

NÁRÁYANA CHANDRA SARMÁ.

Digitized by Google

Digitized by Google



अवतरणिका।

अनुसरणीयसाधुशीलैः समस्तावद्य मंकामभिः समाचरित मालोक्य निशम्य च सच्चीनिवर्त्तप्रवर्त्तकं स्मृतिनिकुरम्बं सम्भवति यादृग्यं फलमच्युतमयं नहि तादृग्यं विष्णुस्तोत्रशतमीति-शास्त्राध्ययनतः कथमपीति विदुषां मतिः। अतएवार्थनिवेशेऽत्र भारतवर्षे काले प्रव्रततमेऽपि पुण्यीयत्प्रभृतीनां नरप्रवरीणां सुचरितप्रवृत्तिः सनातनस्मरणसङ्कल्पे संस्कृतभाषया पद्यन्दःप्रबन्धेन वाल्मीकिव्यासादिभिः कविकुलकुलीनैः समलेखि। प्रमाणान्यत्र च विद्यन्ते बहूनि। अपिच स्थितिरियती सतत मस्मद्देशे साधुशीलानां यत् कश्चिदपि वेदुषस्ति समुत्थाय यः प्रयतादृग्यत स्तादृग्यानां नामोच्चारणं चरेत्, सहि भवति

पूतात्मा, जायते दिनमपि तच्छ्रेयसे तस्य। अहो यत्र पुनर्गीयते ऽधीयतेऽथवा चरितममलात्मनां तेषां जायते तत्सदमपि पूतं, श्रोतॄनसा च क्षीन:. प्रतीतिरनिशमिय मार्व्वाणाम्। येनावलोकितोत विधीतपुराणपठनप्रणाली. स खलु मुक्तकण्ठसुररीकर्त्तेति मे हृदयम्।

विद्वय्येति बहुधा मया सोत्साहचेतसा वर्त्तमानवङ्गसाम्राज्यशासितु र्निखिलजनसम्मानार्हस्य महाजन आसलीडनाभिधानस्य जीवनचरितानुविद्धं कूडनचरितमित्याख्यं क्षुद्रपुस्तकमिदं प्रत्नप्रथानुसारत: संस्कृतभाषया पद्यप्रबन्धेन प्रविरच्य प्रकाशीक्रियते।

असावेव मानुषशार्दूल: सुविश्रुतनीलकराजन्यनिवारणादिषु भूरिषु देशभविकोदर्केषु कर्म्मसु सदयो निहत्य हितमपि स्वकीयमसहात् सुप्रकृतीनां प्रकृतीनां प्राकार्षीत् कुहने च मङ्गलं मनोजवा: समन्तात्। परोपकार एवेह यथा विधेय:, प्रदर्शितं हि तेनास्य प्रकृष्टं निदर्शनम्। तदेवानेकधा कियच्चनु विवृत माखेऽत्र पुस्तके। मनस्विन: परोपकृति रेव जीवने सुख्या कृतिरिदनस्य।

संस्कृतभाषाविदां जनगणानामनायासावबोधाय पुस्तक-

Digitized by Google

मिदं सुप्रगुणपदकदम्बक विरचितं यथाशक्ति। न जानेऽत्र कृतदोषदोऽहं न वेति। अस्माकं पुराणसंस्कृतपुराणपुरातन-ग्रन्थेष्वभिहितघटनावलीकालकलापस्य नास्ति किञ्चि-न्नापि सुबोध्यं निरूपण सुखपम्। अपितु मयाधुनिकरीत्यनु-सारेण पुस्तकेऽत्र विश्वग् घटनाकाल: खष्टीयसम्वत्सरमासादि-क्रमेण श्लोकान्त:शरीरत एव निवेशित:। अथैतद्ग्रन्थग्रन्थनो-पादानेषु ये दोषा दृष्टव्या:. ते सर्व्वे दक्षिणदर्शनै: सूरिभि र्मार्জ্জनीया सत इति विनयविशेषै:।

दूष खलु कृतधियेत्युपगच्छामि यत्, वक्ष्यमाणानां सकुल-गरिमभृतानां महिलाप्रवराणां महाजनां पूरुषप्रमुखानाञ्च पुष्कलानुकूल्येन ग्रन्थोऽयं सुष्ठु सुद्राङ्कित:।

पुटियानिवासिनी श्रीमती महाराज्ञी धरत्सुन्दरी देवी

नाटोर " " " शिवेश्वरी "

कासिमबाजार " " " स्वर्णमयी (सि. आद्. दू)

बलिहार निवासी श्रीयुक्तो राजा कृष्णेन्द्र राय बाहादुर:

हेतमपुर " " " रामरञ्जन चक्रवर्त्तिबाहादुर:

श्रीरामपुर " " बाबु गोपिकृष्ण गोस्वामी

दुवलहाटी " " राजा हरनाथ राय बाहादुर:

Digitized by Google

अतश्चैतेषां महोदयसमुदयानां यथोचितं धन्यवादं करवाणि। विशेषतः शेषोक्तोऽसौ महात्मा (राजा हरनाथः) स्वयं ग्रन्थसाहाय्ये सुहृत्कृत्यकर्म्मणि सर्व्वातिरिक्तं मानुकूल्यमकरोत्। सच्चि परमविद्योत्साहवान् निःशेषनाशप्रवणेऽपि राजसाहीय्यविप्लवविद्यालये सम्पूर्णव्ययभारग्रहणपूर्व्वकं पुनरातिष्ठिपत्तमिति लोकप्रसिद्धिः। एवं बहुधासुना बहुषु व्यापारेषु बहुधनव्ययेन देशहितकरेषु सततं मीयतेऽबलत्वं यथ दृति।

तपः प्रखरदिनजा,
सम्वत् १८३७।

ग्रन्थकृतः
श्रीनारायण चन्द्र शर्म्मणः।

GLOSSARY OF CERTAIN SANSKRIT WORDS USED IN THIS WORK.

Sanskrit	*English.*
धर्म्माधिकार:	Bishop.
राजस्वाकलक:	Collector.
गोप:	Magistrate.
देशपाल:	Commissioner.
राजस्वविभाग:	Board of Revenue.
बङ्गयात्रा	Lieutenant Governor of Bengal.
भारतयात्रा	Governor General of India.
राजप्रतिनिधि:	Viceroy.
व्यवस्थापकसंसत्	Viceregal Legislative Council.
बङ्गराज्यसम्पादक:	Secretary to the Govt. of Bengal.
अनुग: सम्पादक:	Junior Secretary.
प्रवरं देशपाल:	Chief Commissioner.

Digitized by Google

ग्रन्थेऽत्र व्यवहृतानि सांङ्केतिक-चिह्नानि ।

● .... शुम्भम् ।

§ .... विशेषकम् ।

¶ .... कलापकम् ।

Digitized by Google



प्रथमः सर्गः ।

महद्भिः प्रकृतं कृत्य सुकृमेतन्मनीषिभिः ।
सदानुकृतये साधु भवत्यादर्शवन् नृणाम् ॥ १ ।
महात्मचरितं वीक्ष्य ज्ञानं विन्देद्यथा जनः ।
नाद्येषनीतिशास्त्राणि समधीत्य तथा पुनः ॥ २ ।
सुकृच्चरित माख्यातु मर्हं यस्य महीयसः ।
अनन्यसदृशः सोऽत्र हूडनाख्यो महामनाः ॥ ३ ।
सदापरहितासक्तः स्वनिग्नहृदयः सुधीः ।
अक्षुद्रधीं च विनयी वस्तुतो राजनीतिवित् ॥ ४ । *
अतोऽस्य गुणसन्दोहैराकृष्टः प्रसादिभिः ।
प्रयतोऽस्मि चरित्रस्य विमलस्यैव वर्णने ॥ ५ ।
द्विषन्तीमं खलात्मानो ये च स्वार्थपरायणाः ।
लभन्तामुपदेशन्ते श्रुत्वास्य चरितं महत् ॥ ६ ।
भ्रमान्धतमसं तेषा मीर्षोपहतचेतसाम् ।
आदित्योऽप्रियवक्तृणामपकर्त्तु मुदेत्ययम् ॥ ७ ।

Digitized by Google

नातिक्रान्तवती काचित् प्रवृत्तिः प्रकृतिं क्वचित्।
यथाभूत् पूर्वसूरीणां न मे शक्तिस्तथात्र हि ॥ ८।
असावष्टादशशत-माने खष्टीय-वायने।
पञ्चपञ्चाशदधिके दूडनो व्यवहारवित् ॥ ९।
राजनैतिक मारेभे प्रज्ञयैवात्मलब्धया।
कर्म्म लोकातिदुःसाध्यं कर्त्तुं सुयशः दूयिवान् ॥ १०।
अथ कालान्तरे सोऽसौ राजकार्य्योपलक्षतः।
अनुरागञ्चापरागं भेजे नृणां पृथक् पृथक् ॥ ११।
दूडनो वङ्गराज्यस्य यदा शास्तृपदे हतः।
ये तस्य शत्रवः सर्व्वे सानुरागा दृवाभवन् ॥ १२।
एकसर्गवच खस्य साम्प्रतं वङ्गवासिनः।
गायन्ति सुयशो नित्यं सम्भ्रमानत-कन्धराः ॥ १३।
पुरैषां नयनान्यस्मिन् द्विधा भिन्नानि केवलम्।
सम्पन्नेऽस्य गुणा एकै रन्ध्रे दोषा वसन्ति च ॥ १४।
दृशा पिशुनयादर्शि स यथैलखडजै र्जनैः।
न तथा भारतीयेन नरेणैकेन केनचित् ॥ १५।
वङ्गभूमिरियं प्राप्ता भाग्याच्छास्तारमीदृशम्।
विधत्ते यः सदास्माकं सम्यक् श्रेयसं सुधीः ॥ १६।
सार्थवाहैः स्वार्थवाहैः पीड़िता भारते प्रजाः।
दयार्द्रहृदयो योऽयं विपद्भ्योऽत्रायतानिशम् ॥ १७।
पक्षपातमनाश्रित्य दोषानस्य तथा गुणान्।
विचारयामि श्रयिष्ठं द्विषन्निवै र्यथोदितान् ॥ १८।
आसलीडननामासौ निगमे लखडनाभिधे।
नवेम्बराख्यमासस्य त्रयोदशदिनेऽजनि ॥ १९।

Digitized by Google

सोमरामाधिके धन्या चाष्टादशशतप्रमे।
खृष्टीयाब्दे महाभागा प्रसूतः स यया हि सा ॥ २० ॥ *
असौ धर्म्माधिकारस्य पुरोरोयेल्स-वाथयोः।
तृतीयस्तनयः पुण्यो लोकातीतगुणान्वितः ॥ २१ ॥
भारतस्य भूतपूर्व्व-राजप्रतिनिधेः सुधा।
यो लर्डाक्लरण्डसंज्ञस्य भ्रातुष्पुत्रो यशस्विनः ॥ २२ ॥
डूडनः शैशवे लब्ध्वा विद्योपार्ज्जनमग्रतः।
उक्सेटराख्ये नगरे यथारीत्यतिबुद्धिमान् ॥ २३ ॥
विख्यविद्यालयं विष्टो हेलीबरिसमाह्वकम्।
समापयामास तत्र दृश्यग्रिच्छा मयत्नवान् ॥ २४ ॥ *
आसीदध्येषणाहीनः स आलस्य-परायणः।
सदा पठदवस्थायां क्रीड़ानर्म्मानुरागवान् ॥ २५ ॥
तीव्राइतै र्बुद्धिदण्डैः स पारमवहेलया।
मनोनौ-च्चिप्रगत्यातु प्राप विद्यासरित्पतेः ॥ २६ ॥
मनस्वी परदुःखार्त्तो यद्यधितवयस्यसौ।
आसीत्तथैव कैशोरे डूडनो जनरञ्जनः ॥ २७ ॥
अस्यैतान् गुणसन्दोहान् दृष्ट्वा लोकपरम्परा।
स्वयम्बरेव वह्वीया प्रेम्नैवायत्ततां गता ॥ २८ ॥
सदाभिमानहीनत्वात् सारल्याच्च स्वभावजात्।
दुर्लभां तद्विधैरन्यै र्भक्तिं माप स भारते ॥ २९ ॥
प्रीत्या मोहमिवाजग्मु स्तस्य संसर्गचारिणः।
तद्दाल्यसुलभं वीक्ष्य सरलत्व ममानुषम् ॥ ३० ॥
वयसः परिपाकेन एकोऽयममलो गुणः।
न्यायसत्यानुरागाद्या स्तस्य दिव्याः सखीरिताः ॥ ३१ ॥

अष्टादशशततमे शुभे पक्षशराधिके।
खष्टसम्वत्सरे सोऽयमाजगामेडनोऽत्र हि ॥ ३२।
असौ भारतवर्षस्य वर्षे तत्परवर्त्तिनि।
वृत्त एकतमः ख्यातो राजकर्म्मकरोवरः ॥ ३३।
राजसाक्षीसमाख्याने स्थाने प्रथमतोऽथ सः।
राजस्वाकलको गोपो युक्तश्च सहकारकः ॥ ३४।
नाटोरे स उषित्वा तु कियत्काल मतः परम्।
प्रतस्थेऽरङ्गवादाख्ये स्थले राजनिदेशतः। ३५।
तदाप्रभृत्यभूत् स्वीयैः कार्य्यै र्वङ्गजनप्रियः।
अप्रियश्च तदूर्द्धस्थ-राजकर्म्म-कृता मसौ ॥ ३६।
धनार्ज्जनार्थमायान्ति भारतीय महोऽत्र ये।
नाचारं व्यवहारञ्च जानन्तोलण्डजा नयम् ॥ ३७।
पुमांसस्ते तथापीह कृताः शासनकर्म्मणि।
कुर्व्वन्ति स्वेच्छया कार्य्यमनिष्टं जायते ततः ॥ ३८।
दूडनो मञ्जुलस्वान्तो नोपादानेन तेन सः।
रचितो वेधसा नूनं यतः स्यादहितं नृणाम् ॥ ३९।
असौ प्रतिदिनं लोकै र्देशीयैः सह यापयन्।
स्वकार्य्यानन्तरं कालं सदालापादिभिः सदा ॥ ४०।
विजेतृजितसम्बन्धमपाकृत्य चिरश्रुतम्।
एवं संस्थापिता तेन मैत्री जातिद्वयाश्रिता ॥ ४१। *
साक्षात्काराय यः कश्चिदेव तद्वसतौ गतः।
नाकृतार्थो निवृत्तः स कदापि स्वगृहं प्रति ॥ ४२।
अवेतु मयतिष्टासौ रीतिनीत्यादि सारवत्।
प्रजानां भारतस्यैव भावश्चैवं मनोभवम् ॥ ४३।

गूढं हृदयमित्यासीत् कृतेनानेन कर्म्मणा ।
भवितैवोपकारोऽत्र स्वस्य राज्येश्वरस्य च ॥ ४४ ।
तीव्रप्रतिपदा तस्य दूरदर्शितयापि च ।
फलं नायविदो जन्तु ब्रूयते यच्छनैर्मया ॥ ४५ ।
न्यस्त एकोगुरुर्भार दूडनस्य महामतेः ।
राज-शिष्टि-वहे हस्तेऽरङ्गवादे सतस्तदा ॥ ४६ ।
सन्तालीया महाक्रोधान्निष्कृत्यैराजशासनम् ।
राजविद्रोहणार्थाय संहताभ्युत्थिता भृशम् ॥ ४७ ।
विदित्वोदन्त मेतस्य व्यापारस्य भयावहम् ।
अभीलुरिडनः सद्य स्वके कार्य्यं यथोचितम् ॥ ४८ ।
अर्हिताः शान्तिरक्षायै नियुक्तैः कर्म्मचारिभिः ।
सन्तालीयाः खलाचारै र्जाता विद्रोहबुद्धयः ॥ ४९ ।
कति नीलकरावासात् किङ्करा ये निदेशतः ।
सान्तालवसतौ याता आहर्त्तुं श्रमजीविनः ॥ ५० ।
सन्तालीयैः समाक्रान्ता बलाच्छस्त्रास्त्रधारिभिः ।
दृष्ट्वं ते वेदयामासुः प्रत्येताः स्वप्रभूनिति ॥ ५१ । *
सान्तालाः प्रतिहिंसान्धा भूषिता रणभूषणैः ।
राजपूरुषवर्य्येभ्यो ननु दुस्तन्यमर्षिणः ॥ ५२ ।
प्राप्तानां सम्मुखे जन्ये सहसाभ्युदिते स्थले ।
महाजनानाञ्च तत्र विशेषाच्छान्ति-रक्षिणाम् ॥ ५३ ।
पूज्यते तैः सपत्नानां शीर्षपुष्पैर्भयङ्करी ।
विद्रोह-देवता मत्तै रक्तभद्रश्रियान्वितैः ॥ ५४ । *
दूडनस्तत्र सौभाग्यात् प्राप्तस्तद्देशवासिभिः ।
भीतैर्घोरेऽत्र सम्बाधे राजनीतिविशारदः ॥ ५५ ।

Digitized by Google

न परं हितमाजह्रे लोकानां तस्य सत्तया।
राज्यस्यापि तथा तत्र प्रत्युत्पन्नमते कृत ॥ ५६ ।
नतुवा स्यु र्दस्युकल्पै र्देशा जङ्गीपुरादयः।
सन्तालीयैः पशुस्वान्तैः सर्व्वस्वान्तमपाहृताः ॥ ५७ ।
दूडनेनावगम्येति युगपद्वहरम्भरे।
प्रेषितोऽयं समाचारः सैन्यार्थं गोपसन्निधौ ॥ ५८ ।
प्रार्थनां तां प्रसह्यासौ तेन सैन्याप्तये कृताम्।
उदग्रपदसंस्थोऽपि श्रुत्वातिभीतिमागतः ॥ ५९ ।
घटनानावबोधाद्वा स्वीयभीरुत्वगोपनात्।
स पुनस्तर्कयामास वृथा किमिव केवलम् ॥ ६० ।
ततोऽसौ प्रेरयामास कति युद्धास्त्रधारिणः।
सम्प्रहारोचितां स्फूर्त्तिं पूरुषान् शान्तिरक्षिणः ॥ ६१ ।
आहूत्येत्यन्तरे भृत्यानिडनः साहसान्वितः।
तत्रत्यानां बलोन्मत्तान् शूरान् भूम्यधिकारिणाम् ॥ ६२ ।
अस्त्रशस्त्रसमायुक्तान् प्रतीचीभारतोद्भवान्।
शत्रूणां सम्मुखं गत्वा गति न्तेषां रुरोध सः ॥ ६३ ।
विप्लवोपर्व्वबुधस्यास्य ननु क्षिप्र-निवृत्तये।
राजकर्म्मकृतामेका समितिः स्थापिता ततः ॥ ६४ ।
उपाहिता स्तु ये सभ्या महत्यां तत्र संसदि।
दूंलखडजा हि तेऽग्रण्यो राजकर्म्मकृतां सताम् ॥ ६५ ।
दूडनोऽस्याः प्रवेकोऽभूत् सहकारी गुणान्वितः।
कृतमोजोवता तेन कर्म्म चापर-दुष्करम् ॥ ६६ ।
स्वकीयवीर्य्यवत्तायाः पाटवस्यैव कर्म्मसु।
सन्दत्तःसंस्तवः सम्यक् तेनात्रैवोपलक्षितः ॥ ६७ ।

सदा व्यसनहीनोऽसौ व्रजन् सौरे करे खरे ।
निजकार्य्यानुरक्त्याहि गतः श्रान्तोऽपि न क्लमम् ॥ ६८ ।
विद्रोहाग्निरगात्तस्य केवलै र्यत्नवारिभिः ।
शनैः शीतलतामेत्य निर्व्वाणं द्रुतमुल्बणः ॥ ६९ ।
तत्प्रदेशे ततः शान्ते द्रुडनो नीतिविद्वरः ।
सहकारि-देशपाल-पदे उन्नीत एव सः ॥ ७० ।
विद्रोहघटिते घोरे नैपुण्यस्यास्य कर्म्मणि ।
प्रत्युत्पन्नमतित्वस्य पारितोषिकमेव यत् ॥ ७१ ।
शुभाहृष्टमिदन्तेषां यतः सन्तालवासिनाम् ।
तद्देशस्याहितो भारः शासनस्यैव भाजने ॥ ७२ ।
विदितं ब्रिटनीयैर्नो जनै र्नूनं तदातनैः ।
विद्रोहायोत्थिता यस्मात् सन्तालीयाः प्रसह्य तत् ॥ ७३ ।
द्रुडनो बुद्धिमानादौ तदभ्युत्थानकारणम् ।
निर्णेतु मपनेतुञ्च यतते स्म यथाविधि ॥ ७४ ।
तेनानया परीक्षाथ ज्ञात मेतत्तु निश्चितम् ।
सान्ताला साहसा जाताः प्रविद्वाः शान्तिरक्षकैः ॥ ७५ ।
शास्तारं शापयामास भारतस्य यथायथम् ।
द्रुडन स्तन्महाभागः परकीयहितव्रतः ॥ ७६ ।
तदातनस्य तद्देश आमूलात् परिवर्त्तये ।
तेन राजविधानस्य चानुरोधः कृताञ्जसा ॥ ७७ ।
नूतनोऽयं विधि स्तेन तद्राज्यस्य हितेषु हि ।
प्रवणः प्रथमं सृष्टः परं प्रकृतिरञ्जनः ॥ ७८ ।
तदाप्रभृति ते सन्तः सान्ताला: कृतसाम्यिताः ।
वर्त्तन्ते सततं हित्वा द्रुडनाधीःपरायणाः ॥ ७९ ।

व्यापारेऽत्र सजीवास्य समीहा सफलाभवत् ।
तेनोपकारर्णगुणै रुद्वाः सन्तालजाश्चिरम् ॥ ८० ।
प्रमुक्तोऽत्याचिताद्देयः सान्तालः शान्तिरक्षिणाम् ।
अभवद्युगपच्छान्तिः पूरुषाणामतःपरम् ॥ ८१ ।
शान्तिरक्षादि कार्य्यञ्च दण्डयानां दण्डकर्म्म च ।
ग्रामस्यसज्जनस्यैव हस्ते न्यस्तं तदावधि ॥ ८२ ।
केवलं देयपालेन नियुक्ताः सहकारिणा ।
किङ्कराः कति यस्त्राढ्याः शरीरत्वा बलाच्चहाः ॥ ८३ ।
ये विचारगृहास्तत्र विधिरज्जु-दृढ़ीकृताः ।
गुणच्छेदाङ्कता स्ते च भग्नता मागु दुर्गताः ॥ ८४ ।
व्यवहारायणोलूका वसन्तिस्म च तत्र ये ।
नवीनविधिसूर्य्यस्य तेऽन्यतो रोचिषाजिषुः ॥ ८५ ।
नियुक्ताश्च स्थले तेषां मान्याः कतिपयास्ततः ।
दूयुरोपोद्भवा देयपालकाः सहकारिणः ॥ ८६ ।
तेषां कार्य्यसुयोगार्थं गत्यर्थं न्यायसिन्दुषु ।
गठितैका व्यवस्थानौः सात्मान्मङ्गलरूपिका ॥ ८७ ।
अनेकविषयेष्वेव भारतस्येदृशी प्रथा ।
जात्यवस्थाविभेदेन दृश्यभाव मिता खलु ॥ ८८ ।
आदिमासभ्यजातीनां यादृशीयं विधिश्रुता ।
विधिबद्धा व्यवस्था न तथा मङ्गलदायिनी ॥ ८९ ।
निर्णीयन्ते मया दोषा गुणा स्वान्योन्यसंश्रिताः ।
तद्विधानहयेनेति साधितस्यात्र कर्म्मणः ॥ ९० ।
विधिरज्जु-समावद्ध-व्यवस्था-पत्तपातिनाम् ।
श्रेयसे यद्भवेन्मन्ये एकदेशदृशां नृणाम् ॥ ९१ ।

Digitized by Google

विधिवर्ष्मेषु देशेषु दायदण्डविचारकैः ।
कीटैरिव पुटावासैः पिञ्जरस्थैर्यथा शुकैः ॥ २२ ।
अभियोगस्य निष्पत्तिं यश्च वादि-विवादिनाम् ।
क्रियते नियमागार-निवद्धैरेव केवलम् । २३ ।
न व्यवस्थापकैरेते यत्नात्सत्र प्रदर्शितम् ।
अतियातुं हि पन्थानं जना सूच्चैःपदौकसः ॥ २४ ।
न कर्म्म हितमप्येकं कर्त्तुं राज्यशुभावहम् ।
तदाम्नाया मनाक् पूर्व्वं शमाख्ते राजपूरुषाः ॥ २५ ।
विपर्य्यासन्तु पश्यामि प्रदेशे हि विधिच्युते ।
सर्व्वस्मिन् विषये सर्व्वं सर्व्वदाऽश्च सर्व्वथा ॥ २६ ।
दायदण्डविचारार्थं नियुक्ता ये मनीषिणः ।
अशेषशमता तेषां विद्यते तत्र कर्म्मणि ॥ २७ ।
गृहीत्वा सारतात्पर्य्यं निर्दिष्टादनुशासनात् ।
प्रातिभेदात्प्रयोगस्तै र्धीयते विविधो विधेः ॥ २८ ।
भवेयुस्तेऽन्यायुक्ताः कौलेयाः क्षतिनश्च ते ।
उदारमतयो देश-काल-पात्र-विवेकिनः ॥ २९ ।
तदा साधुभिराचारे तेषां व्यक्तिगतं न तु ।
कामं सामाजिकस्यापि भजन्ते भविकं प्रजाः ॥ १०० ।*
ते चापरविधाः किन्तु यदि स्युः स्वार्थदर्शिनः ।
नयन्ति देशं मुच्छेदं मौर्य्या अजा अधो यथा ॥ १०१ ।
नितरां नतु गच्छन्ति तेऽन्यकार्य्यं हि दुर्धियः ।
कुर्वन्ति मनुसन्तुं स्वां लोकनिन्देशणेक्षिताः ॥ १०२ ।
स्थाप्यन्ते ते परीवादै र्दोषसङ्घर्ष-दूषिताः ।
क्षीणे स्थानान्तरे नूनं स्वपदेशोपपत्तये ॥ १०३ ।

वस्तुतो कथयामीति विधिविच्युत-नीहति।
प्रकृतीनां दुःखभागा-दधिका सुखसंहतिः॥ १०४।
विधीते विषयेऽन्यत्र कर्मैरित्युररीकृतम्।
प्रजानां नतयौर्षाणां यथा दुःखं तथा सुखम्॥ १०५।
विश्वेऽगते धीमानिडनोऽध्यवसायवान्।
राजप्राभृतमानाद्यै र्वस्तुभिः स पुरस्कृतः॥ १०६।
मन्द्रमर्दल-निध्वाने चापकान्तारिपिच्छले।
संसक्तकजयाघोषे वैजयन्ती-समाकुले॥ १०७।
सान्तालास्कन्दनत्तेवे गीतवातातपोद्भवैः।
आभीलै रिडनोऽत्यर्थं माक्रान्तः पीड्यावद्यः॥ १०८।*
अथोऽसौ स्वास्थ्यलाभार्थं वायुसेवनहेतुना।
ययौ मारीचसद्वीपे सिन्धुवक्षःस्थलस्थिते॥ १०९।
नाध्यवात्सीत् स निश्चिन्तः परचिन्तापरायणः।
स्थलं तद्विनमध्येकं कथं धीमानकल्पयत्॥ ११०।
द्वीपे तत्र समानीतान् भारताच्छमजीविनः।
सच्चद्वैरर्हितान् घोरं वपनव्यवसायिभिः॥ १११।
हातातमातरित्यादि वदतोऽश्रुविसर्जिनः।
धूर्तनः परदुःखार्त्तः समालोक्य विसिष्मिये॥ ११२।*
अदयिष्ट दरिद्राणामिडनः श्रमजीविनाम्।
कृपार्द्रं विदधे हि सर्वं दुःखं मनस्विनाम्॥ ११३।
सेहे विप्रकृतं नासौ तत्र तैः कृषकैः कृतम्।
दुरात्मभि रभुक्तेषां ग्रासनाय च यत्नवान्॥ ११४।
पश्यन्तिस्म न तत्रत्याः कर्म्मैषां राजपूरुषाः।
आयान्तं दृष्टतः पान्था यथासन्नं जगादनम्॥ ११५।

अध्यतिष्ठत्तदा दिष्टादिण्डनः श्रमजीविनाम् ।
भारताद्यनीतानां द्वीपमेतं महामनाः ॥ ११६ ।
स तेषां धनमत्तानां वणिजां पिशुनात्मनाम् ।
आदावत्याहितं घोरं ख्याततामनयद्भुवि ॥ ११७ ।
दरिद्रश्रमजीव्यानां फाटद्वीपे तु हत्यया ।
दण्डनोऽभूदमर्षान्धः क्षतया तै र्दृशंसकैः ॥ ११८ ।
धिक्स्वामीति वदन्ति स्म तेनैवोत्तेजिता जनाः ।
दिशो व्याप्तिरे तेषां दोषोद्घोषबलाहकैः ॥ ११९ ।
सच संवादपत्रेषु तत्र दे.वापकीर्त्तनैः ।
युगपद्वणिजो जिह्मां चक्रे नुन्नवदाकुलाम् ॥ १२० ।
समेत्य कलिकातायामानुपूर्व्या स तत् पुनः ।
चरितं गर्हितं तेषा मकार्षीद्राजगोचरम् ॥ १२१ ।
राजप्रतिनिधिश्चेति ज्ञात्वामर्षवशं गतः ।
ददावनुमतिं श्चेत्थं दुरात्मोत्पातशान्तये ॥ १२२ ।
प्रदत्तैः शासने तत्र प्रोक्तैः राजपूरुषैः ।
वणिजां दमनायैव राज्ये चौपनिवेशिकै ॥ १२३ ।
प्रतिभू र्दीयते नाम्नो यावदर्थसमावहः ।
न तावत् प्रेरितव्या हि भारताच्छ्रमजीविनः ॥ १२४ ।
यदा यत्रावात्सीद्वसति च महोदारबुद्धिः,
समानैषीत् कालं नयति च परार्थं स हृदयम् ।
उपेक्ष्य श्रेयः स्वं निहतमपि हत्या प्रकृत्या,
दयावान् संहृत्या विहित दृण्डनः स्वस्ति धात्रा ॥ १२५ ।

इति श्रीमद्दिण्डन-चरिते प्रथमः सर्गः ।

Digitized by Google

द्वितीयः सर्गः ।

षट्पञ्चाशत्तमे वर्षे कलौ यातेऽथ सम्प्रति: ।
असौ मारीचसद्द्वीपा-दृष्टादृष्टफलाधिके ॥ १ ।
तदा वाराणसीक्षेत्रे स ब्रह्मवे मान्ये स्टङ्कीतवान् ।
राजस्वाकलनक्षेत्रोप-मदे हे युगपत् सुधी: ॥ २ ।
सभा स्वात्र चतस्रस्तु यापयित्वा स्वकार्य्यत: ।
स राजस्वविभागेऽत: स्तत: सम्यादकोऽनुग: ॥ ३ ।
गोपो भूत्वा जगामासौ पुनस्तत्परवत्सरे ।
स्थानीये कटकाख्याने सुरम्योदधिसन्निधौ ॥ ४ ।
श्रयते किञ्चिदन्तीयं दर्शितोऽनुग्रहो महान् ।
तं वङ्गादपसार्य्यात्र शाखा नीलकरान् प्रति ॥ ५ ।
श्रुति प्रविदितं सर्व्वं निम्नश्रीतोऽर्थलुब्धकै: ।
पशुचारै रभद्रेयं: कथं नीलकरै सदा ॥ ६ ।
एकेनैवेङ्गनेनात्र तेषां मुत्पातशान्तये ।
यत् कृतं तद् बभूवात्र सदावङ्गजनहिषाम् ॥ ७ ।
महामना ग्राण्टनामा वङ्गशाखा तदातन: ।
कार्य्यं तस्य समालोच्य परितोष मियाय तत् ॥ ८ ।
स राजस्वविभागस्य कर्म्म तत्प्रभृतीङ्गन: ।
समाप्य प्राप्य पादाभ्यां रिपून् कार्य्यान्तरं गत: ॥ ९ ।
वगाच्च निर्म्मले तस्य प्रयान्ते चरितोदधौ ।
विमा यत्नात्मया खण्डमणिमुक्तं रत्नयुग्मकम् ॥ १० ।

एतद्देशभवैः सार्द्धं मिलित्वा क्षत्रतं जनैः ।
भावं तेषां समावेतुमिच्छैकं रत्नमाहृतम् ॥ ११ ।
द्वितीयन्तु परं रत्नं प्रकृतिः स्वार्थवर्जिता ।
उदग्रचेतस् तस्य सर्व्वतःसमदर्शिनः ॥ १२ ।
प्रतीक्षविग्रदश्याम-वर्णभेद मुपेक्ष्य हि ।
मत्वैकस्य प्रजा राज्ञ आद्रियन्ते च यै र्वयम् ॥ १३ ।
अहो राजपुरुषाणां सन्ति विटनजन्मनाम् ।
स्वाल्पभावाः सदाख्याभिः स्वल्पका येऽत्र तादृशाः ॥ १४ ।
देशीयो यदिवा कश्चित् समभ्रान्तः स्वार्थवर्जितः ।
सुराजपुरुषं याति श्वेताङ्गं द्रष्टु मीहशम् ॥ १५ ।
भ्रूकुटिं दृश्यते तेन विषवक्त्रस्य केवलम् ।
विना सभाषणालापैः सर्व्वभद्रजनोचितैः ॥ १६ ।
अथवाऽभिमानी स आत्मौपम्येन तं पुनः ।
मन्यते कुत्सितस्वान्तः स्वार्थसिद्धौ समागतम् ॥ १७ ।
एतेन स्वपदस्यासौ गौरवस्यापि खर्व्वताम् ।
आशङ्क्यावेक्षिकं भीम-मूर्त्तिं दूरीकरोत्यसम् ॥ १८ ।
पार्थक्यप्रियता चात्र स्वैरिता विटनौकसाम् ।
प्रजानां भारतेश्वर्य्या एकताभङ्गकारणम् ॥ १९ ।
दृश्यन्ते चेत् पृथग्दृष्ट्या राज्ञाज्ञायविभेदतः ।
प्रजाः प्रतिपदं राज्ये भवत्यकुशलं सदा ॥ २० ।
महाशयै र्बुद्धिमद्भि र्जनै रिंलण्डजै रिति ।
अरीलतं मुक्तकण्ठं कोविदै रेत्य भारते ॥ २१ ।
श्वेताङ्गै र्हीयते ताभ्यो यद्येकं मिलनसाधनम् ।
मन्यन्तेऽवक्रयकीलाम् स्वप्राणान् भारतप्रजाः ॥ २२ ।

भारतक्षोजनैः सार्कं सदाभ्युद्वालचारिभिः।
धातुमाश्रायसम्बन्ध मीहैयान्तु विडम्बना ॥ २३।
जानन्तोदन्तु नः सर्वे बान्धवा भारतोद्भवाः।
देशाचारविरुद्धा सा प्रथा कुत्साविधायिनी ॥ २४।
यातेष्वस्मासु केषाञ्चिद्दन्धूनां भवनेषु हि।
पश्यामो योषित स्तेषां विद्यानोऽन्तःपुरं न वा ॥ २५।
दुःखं नानुभवामोऽतः कारणान्नतु मानसम्।
चिरसञ्जातसम्भाषो नवा तुष्यति मित्रता ॥ २६।
दिने दिने श्वेतकाया वर्द्धन्ते संख्ययाधुना।
भारतीयजनैः सार्द्धं मैत्रीमिच्छन्ति ये सदा ॥ २७।
विख्यात-कर्णपूरोत्या-द्भारतानीकिनीकृतात्।
अयोध्येलण्डज-क्षात-कलत्रात्मज-संचयात् ॥ २८।
राजद्रोहात्परं घोरा भीतिश्चा त्रिटनौकसः।
समुपप्लुतराज्यस्य शान्तिरक्षणमानसाः ॥ २९।
विभिन्नान्वाययो र्जात्यो रनयो र्यें परस्परम्।
दूडनोऽन्यतम स्तेषां सख्य माधिपतोत्सुकाः ॥ ३०। §
स्थाने वाराणसताख्ये स आसीत् कर्म्मवशाद्यदा।
उदारोऽकृतवृत्तीनां जन्नौ नामान्यपि स्वयम् ॥ ३१।
अन्ये यान् खुक्कान् स्पृष्ट्वा तद्विधा क्रिय माप्नुयुः।
खलु प्रियतमं तेषां संसर्गं सममंस्त सः ॥ ३२।
तत्प्रयोगुणसङ्घर्ष-दृढ़सौवर्णग्रहङ्कलैः।
बद्धा वङ्गप्रजा मोहान्यभा दूव ताः स्वयम् ॥ ३३।
दूदानीमिडनो राज्ञा वङ्गयात्रा कृतोहि सः।
श्रुत्वैतत् सुखमाचारं हर्ष न्ता भव मायवुः ॥ ३४।

स वर्ष्यं कार्य्य मेकन्तु तदा वाराणसे वसन्।
परं क्षेमङ्करश्चके सदापरहितव्रतः॥ ३५।
दन्दश्यूकाभिधं दैत्यः प्रधान्तः पीड़ितप्रजम्।
अयं नीलकरैर्ग्रस्तो राहुणा चन्द्रमा इव॥ ३६।
पिशाचै रचितां तान्त्र संस्मृत्य घटनावलीम्।
तदातनीं कोऽत्र योग भीति मापद्यते जनः॥ ३७।
अहो तर्हीडनेनात्र पुरः स्वस्य महात्मना।
अपक्षपातिता चैव सत्यवत्ता प्रदर्शिता॥ ३८।
संक्षिप्ता विवृति रेषां चरितस्य विधीयते।
मया नीलकराणान्तु महापापावृतात्मनाम्॥ ३९।
कति संवादपत्राणि तेषां तत्कालजानि च।
तत्कृपापरिपुष्टानि अभूवन् सुखयन्त्यवत्॥ ४०।
राज्ञ्या नीलावृताजीव्या येषा मासीदिदं मतम्।
क्षन्तव्याः शतशो दोषै रपराद्धाश्च ते मुहुः॥ ४१।
यतः कृतघ्नतापाशै रानद्धा राजपूरुषाः।
वङ्गीयास्तै र्महाभागै रेवं देशहितैषिभिः॥ ४२।
भारतेऽतिश्रमं यत्नं कृत्वा वङ्गधनक्षयम्।
भूमे रुत्पादिका शक्ति राहिता तै र्महात्मभिः॥ ४३।
प्रतिग्रामं प्रतिष्ठाय ते च विद्यार्थिनां मठान्।
अज्ञानतिमिरं नृणां दूरीचक्रु रिवारुणः॥ ४४।
दातव्यौषधशाला स्तैः संस्थाप्योपक्षतिः कृता।
आतुराणां दरिद्राणां महती सर्व्वतः स्थले॥ ४५।
तुदन्ति राज्यसत्कार-निरतानीदृशां स्तु ये।
ते कथन्ति कृतं नूनं मुक्ताः शासनकर्म्मणि॥ ४६।

कदाचित्ते: प्रजा वङ्गया: कांश्चित्कार्यवशात् क्वचित्।
कारायां मवरुध्यन्ते तरसा चेच्छयाऽथवा ॥ ४७।
दमनायासां दह्यन्ते रुदनानि तै:।
दरिद्राणां निश्वासाय वङ्गयत्वाधितानि च ॥ ४८।
वङ्गमस्वीकृतानां वा नीलवीजानि वैदत।
जप्यन्ते जीवनानीह कामाक्षित्प्रतिघाग्निते: ॥ ४९।
तथाप्यत्र हि ते दण्डया न कथं राजपूरुषै:।
न गण्यं दोषभीवीरं गुणरत्नोघराजिषु ॥ ५०। ¶
धृति स्वार्थजया तेषा माहार्य्यगुणयोभवा।
दोषानावारिषु क्षिप्त्वा स्वद्वार्त्तापत्रसाधका: ॥ ५१।
तेभ्यो दण्डं दातुमिच्छुं स्ते च तत्पक्षसंश्रया:।
सदास्मापपनायन्ते स्वदानिति विचारकान् ॥ ५२।
समैहिषत कालेऽस्मिन्नाधीते कुत्रचिद्यदा।
प्रजा स्वद्दस्युहस्तेभ्यो वङ्गया उत्त्रातु मात्मन: ॥ ५३।
तदैव पिशुनाचारा स्ते राजद्रोहिका धृति।
स्वयिष्ठारोपितै र्वाक्यै र्घोषयन्तिस्म ता: सदा ॥ ५४।
आप्नुयुस्ता यथा राज-दण्डं तिथ्यापराधत:।
विहित स्वद्विधौ यत्न: परार्द्धो यत्नराधमै: ॥ ५५।
वङ्गस्य शासृभि र्दत्ता तदा नीलकरान् प्रति।
स्थानीयां स्वान् प्रमत्यार्हान् विचारस्य धृति: शुभा ॥ ५६।
अथेपशक्तिसम्पन्ना: सन्त एव मनेकधा।
प्रकृती: पीड़यामास्तु स्ते नीलाकृतदृत्तय: ॥ ५७।
केषाञ्चिदधमर्णानां यत्नेनोपा निजेच्छया।
स्वेषु नीलवीजास्तै स्वदा न्यायपथातिगै: ॥ ५८।

समुच्चैःपदसंरूढै राजनिर्व्यंशभोजिभिः।
लोकातिगर्हिता प्रीतै रीतिः सैवानुमोदिता ॥ ५८।
अधःस्थो यद्यथो तेषा सुदारो राजपूरुषः।
नीतिज्ञो वावजानाति कचित्तां निन्दति प्रथाम् ॥ ५९।
स्वादर्थादत्र शिष्टोऽसौ मौन मासादितुञ्च तैः।
विप्रलब्धाहिना छाया द्रुमपादगता यथा ॥ ६१। *
विचारकैः स्वजातीय-जनेषु प्रेमवत्तया।
कृत्त धर्म्ममनादृत्य छता सत्यावमानना ॥ ६२।
नृणां स्वान्ते प्रशान्ते तु नाधातु मधुना क्रुधम्।
दूच्छेयं पुनरालोच्य वार्त्ता स्वा लोमहर्षणीः ॥ ६३।
दूच वक्तव्य मेतत्तु यदा साधारणं मतम्।
वार्त्तापत्रसुखाहान्त मीदृशं कलुषान्वितम् ॥ ६४।
सम्राजः कर्म्मकर्त्तृणां मनोभावच्च तद्विधः।
एकपक्षपरोऽत्रासीत् प्रजानिष्टप्रवर्त्तकः ॥ ६५।
तदाधस्तन-नीतिच्च-[illegible]अकर्म्मछतासुत।
परदुःखानुतप्तानामपि हृच्छिषचैतसाम् ॥ ६६।
व्यक्ति मनोऽभिजातस्य दोषदर्शेति कीदृशी।
सूक्ष्मानामिव दुःसाध्या सवोधै रुपलभ्यते ॥ ६७। ¶
काले चात्राप्यवस्थायां सुप्ता सहस्युपीड़नात्।
वङ्कप्रकृतयो हीना: छपया यै मनस्विभिः ॥ ६८।
निजानिष्ट मनाशङ्क्य निश्चितम्भावि यै मंहत्।
आविष्कृत्य हिषां दोषानुत्तेज्य च जनान् भयम् ॥ ६९।
छत मेतच्छुभं कर्म्म तदा नीलकराशुभम्।
ऋतपक्षं समालम्ब्य प्राकृता खे न मानुषाः ॥ ७०। §

Digitized by Google

उत्त्राता विपदो वङ्ग-प्रजा येषां समोदया।
आसीन्महात्मनां तेषा मिडनोऽतोऽग्रनायकः ॥ ७१ ।
दृष्ट्वात्याचरितं घोरं ये नीलकरसम्भवम्।
चक्रुः पोषकतामस्य तूष्णीभूय न केवलम् ॥ ७२ ।
ये च न्यायपथातीतं कार्य्यं सूक्ष्मतमस्य हि।
वीक्ष्य राजपुरुषस्य प्रतिवादार्थं सुत्यिताः ॥ ७३ ।
तेषा मेकेडनस्यैव नाम वङ्गजनान्तरे।
उपलोरसि कीर्त्याङ्क चिराय तनिता पदम् ॥ ७४ । §
दूडनेन कृतं प्रेक्ष्य प्रजापक्षसमर्थनम्।
ययुः सत्याश्रय न्तस्य विस्मयं परिपन्थिनः ॥ ७५ ।
आदत्तेस्म यदा काचि स्त्रीकार्य्यालयात् प्रजा।
कार्षिकानग्रतोऽप्यस्यान् पर्य्युदस्यनवत् क्रति ॥ ७६ ।
तदैव युगपक्षस्था भ्रुभौ नीलकरैरत।
उत्पात्याभिनवं सत्व मुप्ता नीलक्षुपा बलात् ॥ ७७ ।
प्रभवन्ति न तत्क्षेत्रे चिरोपस्कृत-भोजिनः।
देश्याः प्रभुत्व साधातुं यावद् भूस्वामिनः क्रयम् ॥ ७८ ।
तावद् विदधिरे लुब्धा ते च नीलकरा सदा।
बलात् सत्यां नितम्बिन्यां पुमांसः कामुका यथा ॥ ७९ ।
पुरेयं यत् प्रथा वङ्गे आसीद्दुष्टदिनावधि।
स्त्रीकृतं राजपुरुषैः कियद्-ब्रिटनजै रिति ॥ ८० ।
दूडनः स्फुरतः सम्यक् प्रतिवाद मसाधयत्।
तद्विधे र्दारदस्येव प्रजामङ्गलकाङ्क्षया ॥ ८१ ।
दुर्भाग्यात्तु मदीयाया देशपालेन तत्कृतम्।
स्मर्त्तीतं स्वमतानैक्या च्च तदा तदवज्ञया ॥ ८२ ।

Digitized by Google

दूडनेन न तच्छुत्वा निदेशोऽयं शुभंयुना।
द्विषां गर्व्वविघाताय श्रेयसे नः प्रचारितः॥ ८३।
प्रजानां क्षणिकीभ्यानां स्वेच्छानिघ्न मनूनकम्।
प्रभवः स्वयमेवात्र श्रमस्य च धनस्य ताः॥ ८४।
ताभि र्विज्ञात मेतच्च नीलकार्य्यालयाक्षतः।
मुद्रोद्धारोपदानं हि नीरोपणकारणम्॥ ८५।
चेन्नीलवपने काचित् स्वयम्बरीकृता प्रजा।
पुरतो भूति मादाय करोत्यङ्गीकृते त्रुटिम्॥ ८६।
तद्विधस्याभियोगस्य दायाधिकरणे तदा।
भवेद्विचारनिष्पत्ति र्यथारीति यथाविधि॥ ८७।
नाधिकारोऽस्य निष्पत्तौ दण्डाधिकरणे कदा।
शोभते शशिसङ्काशो भास्करेऽङ्करे नहि॥ ८८।
स्वच्छन्देन विना तासां बाध्यन्ते तरसा प्रजाः।
तैश्चेत् कर्म्म समाधातुं पूर्व्वं मङ्गीकृतं हि यत्॥ ८९।
राजकीये रमी सद्यो देयस्य शान्ति-रक्षिभिः।
दण्डनीया भवेयुश्च दोषापनोदकारणात्॥ ९०।
दूडनस्य तमाकर्ण्य प्रजाना मुपदेशकम्।
ययुः प्रत्यर्थिनः क्रोध मादेयं ते शुभावहम्॥ ९१।
ते तत्प्रभृति रोषान्धा दूडनस्यात्र यत्नवः।
स्वाराजस्येव दैतेया जाताः सागरमन्थने॥ ९२।
विघ्नं नीलकरै रेत-द्धताशैः क्लिष्टमानसैः।
चातुर्य्यवञ्चनासार-नीवीनैमेयकर्म्मभिः॥ ९३।
तस्यायत्नेद्विधिर्वङ्के भवेद्राजानुमोदितः।
नैकं दिन मत स्तेषां क्षणिकर्म्म चलिष्यति॥ ९४।

विचारार्थं नदीयाया देशपालस्य सन्निधौ।
अभिग्रहि: कृता सद्य स्तैश्च तन्मतखण्डनात् ॥ ९५।
अत्युच्चतपदासीना ते वार्त्तापत्रसाधका:।
उत्तङ्गतरशाखास्था शारशाखाचगादृव ॥ ९६।
एकतानगतध्यानं पीड़यन्तो जनश्रुती:।
शुभोदर्कविधे तस्य प्राचक्रु: प्रतिपत्तताम् ॥ ९७। *
अगत्या देशपालेन तेन तत्पक्षपातिना।
स्व मादेश मपाकर्त्तु मनुरुद्ध स्तदेडन: ॥ ९८।
स भरण्यप्रियस्यास्य सद्यो नाप पराजयम्।
दूडनो नीतिविद् वाक्याद् य: कश्चिदिव मानव: ॥ ९९।
व्यापारेऽत्र जये लब्धे नीलकृत्पक्षपोषकै:।
पापस्य वैजयन्तीव द्वत्यतिष्यति भारते ॥ १००।
कर्त्तुं यदृच्छया शक्ता: प्रजानामत्र गौरवात्।
शुभं वा चाशुभं यच्च-न्नरा हौलण्डसम्भवा: ॥ १०१।
गुरुदाहरणै राप्तो विश्वासोऽयं भयप्रद:।
प्रकृतीनां हृदारामे व्याघ्रादृव वत्स्यति ॥ १०२।
विचिन्तेति महात्मासौ सुमीमांसासमाप्तये।
प्रवृत्तिं वङ्गशास्त्रारं वेदयामास तां तत: ॥ १०३।
कृता तेनास्य निष्पत्ति रष्टादशशतप्रमे।
ग्रहभूताधिके खृष्टवर्षे न्यायानुसारिणी ॥ १०४।
प्रजानां भाग्यत स्तेन धीमता यद्विचारितम्।
दूडनस्य मतासङ्गि सम्यक् तत्तु महामते: ॥ १०५।
तन्नीलाम्बुतटक्षीनां रुधिरीतिं परीक्षितुम्।
कर्त्तव्यतास्य निर्णेतु मत्रैकाय सभा कृता ॥ १०६।

खट्वपटितमेऽब्दे तु योऽष्टादशयुतेऽधिके।
आहूत दूडनः सभ्यै नीलावृतस्य साक्षिवत्॥ १०७।
देशस्य श्रेयसे तस्यां समित्यां यच्च सोऽवदत्।
तेन प्रकटिता तस्य खतः सत्यानुरागिता॥ १०८।
वक्ष्ये नीलवृषिः स्वेच्छं प्रजाभिः क्रियते नवा।
संदृष्ट दूडनो वक्तुं सभास्तारै रिदं हि तैः॥ १०९।
एतत्प्रश्नोत्तरेणोक्तं सुस्पष्टं मनस्विना।
तेनेति कल्पया वाचा स्फुटं वक्तुहितैषिणा॥ ११०।
खिलायां तटभूमौ वा निरूढं क्रियतेऽहतम्।
बाध्यन्तेऽत्यत्र वसुश्च बलाच्चीलचुपान् प्रजाः॥ १११।
नहि नीलवृषि खासां कथं वा लाभदायिका।
तामाश्रित्य नापकारं सोढुं शक्ता यदृच्छया॥ ११२।
विदधीरन् प्रजा खास्वेदृक्तिं स्वेच्छानुसारतः।
नीलावृतवृतः कुर्य्युर्न तासां महित न्नदा॥ ११३।
निश्चयेति सदस्या स्ते दूडनस्य महात्मनः।
उररीचक्रिरे तत्त्वं वचसोऽस्य महौजसः॥ ११४।
नीलवृद्धि स्तु बीभत्स उपायो विहितः क्रमात्।
प्रजा स्वत्कर्म्मणो भावं ज्ञात्वा विक्रय मागताः॥ ११५।
भूमे र्भूम्यधिकारित्वं सत्व मन्यविधञ्च यत्।
क्रीत न्तै र्वेद्य मानेतुं प्रकृती र्वेद्भि र्धनैः॥ ११६।
दूडनो राजकार्य्यार्थं मासीद्द्वारासते यदा।
इत्यावेदितवत्य स्तं प्रजा दुःखभराहिताः॥ ११७।
सम्पूर्णपरवत्यो हि ता नीलावृतकर्म्मणि।
सुगवद्वा वलीवर्दा यथा याने निरन्तरम्॥ ११८।

कार्य्यतो राजविधिना स्वतन्त्राः सर्व्वथा हि ताः ।
निहत्ता नीलवपनाद् यदा अन्नुरितीरु तु ॥ ११८ ।
संसदः पञ्चसभ्याना मासीत् फर्गूग्रनाभिधः ।
परं नीलहतां मित्रं तस्या एकतम सदा ॥ १२० ।
दूडनस्य वचः श्रुत्वा स न तत् प्रीति मायवौ ।
सुजनस्येव धर्म्माढ्या सुपदेशं मलिम्लुचः ॥ १२१ ।
स तेन कुटिलैः प्रश्नै र्नीलहत्यप्रसाधिना ।
वाचां प्रमादपर्य्याय-प्रमाणार्थं परीक्षितः ॥ १२२ ।
सातु फर्गूग्रनस्येहा सद्योऽत्र विफलाभवत् ।
पङ्गो र्लङ्घयितुं गोत्रं यथा गहनगूहनम् ॥ १२३ ।
भिय मापोत्तरं कर्त्तुं प्रश्नाना मिडनोऽस्य न ।
हरिः सपरिवारस्य करियूथपते र्यथा ॥ १२४ ।
सप्रमाणोऽभवत्तेषां वरं दोषः स्वलाञ्छनाम् ।
भयं नीलकराणान्तु तस्य सद्वाक्यकौशलैः ॥ १२५ ।
आश्वयाश्च दूवासो हि प्राप कार्पासवाससा ।
आहृतः संप्रकाशञ्च स्वयमाहार्य्यसम्पदा ॥ १२६ । *
अयमेको महानस्ति तस्य लोकहितैषिणः ।
दूडनस्य लभ्यवर्णो गुणो मानवदुर्लभः ॥ १२७ ।
समाजे चिरूढ़ाया: कुप्रथायाश्च कुत्रचित् ।
कुरुते स्वमतव्यक्त्या प्रतिवादं सदैव सः ॥ १२८ ।
धर्म्माधिकरणानाञ्च ग्राम्यानां ननु यादृशी ।
आसीद्विचारकर्त्तृणा मवस्था भयदा तदा ॥ १२९ ।
केषाञ्चिच्छेतकायानां तत्र तै र्विटनौकसाम् ।
विचार स्तस्य बन्धूनां जातीयानां भवेन्न वा ॥ १३० । *

उत्तरेणास्य तेनोक्तं प्रश्नस्येति मनस्विना।
प्रजाः समतुलाः सर्व्वा विचारे राजसन्निधौ॥ १२१।
भवेयुः स्थानि योग्यानि धर्म्माधिकरणानि चेत्।
देशीयानां विचारार्थं न किं ब्रिटनजन्मनाम्?॥ १२२।
वोढुं नूनं न शक्तोऽस्मि वर्णयोः श्वेतकृष्णयोः।
भेदाद्विचारकार्य्येषु दृश्यत्वस्य हि कारणम्॥ १२३।
न भरव्यभुजामेकः कोऽपि राज्ञा तथाविधम्।
वक्तुं स्वीयमनोभावं संशक्नोति ससाध्वसम्॥ १२४।
कर्त्तव्यज्ञानमालम्ब्य प्रत्युक्तमिति तेन यत्।
दूषणस्यानुयोक्तॄणां आतमप्रीतये भृशम्॥ १२५।
श्लाघ्यन्ते स्वस्य माहात्म्यं स्वयं कर्म्मफलापकैः।
गौरवं गुणिनां यान्ति न मित्राणि यथा द्विषः॥ १२६।
अस्माधुनापि सम्प्रीत्या सैकतानमनोहरा।
वङ्गीयमहिलाभिश्च गुणगीतिः प्रगीयते॥ १२७।

अनुदिनमतिशयभक्तिसनाथा,
दूषणगुणायनशोभनगाथा।
वङ्गवधूत्वाद्वैकनिवासा,
मे समुदेति हृदीह शुभा सा॥ १२८।

वागेश्रीरागिण्या गीयते।

कुरु जगदीश्वर,
कुशलिनं सतत मिडनं तं मङ्कुर।
नाथ नियतनुति, नाथामह दूति,
वयमतिग्रस्तविहीना जगतीकर।
यः प्रकृतीः सुप्रकृतीः लालयां
तत्रे मित्रमिव वह्निं,
घोरनीलकरकर्म्मरक्करतो,
व्यधित च भविक्रमिहावर॥

इति श्रीमद्दिडन-चरिते द्वितीयः सर्गः।



Digitized by Google

तृतीयः सर्गः ।

खष्ट-सोमर्त्तुमे वर्षे त्वष्टादशशतताधिके ।
सभायां सिक्किमेशस्य गन्तुं कार्य्यवशात् कुतः ॥ १ ।
नियुक्तो राजदूतोऽयं मिश्रबो नीतिविद्वरः ।
पर्व्वताधिपते र्व्यक्तं यत् पश्चादभिधीयते ॥ २ । ●
अष्टादशशतासक्ते खष्टाब्दे वर्त्तुसम्मिते ।
शमच्छान्ति-विधायिन्या राज्यस्य भगवासिना ॥ ३ ।
विवादो भारतेशस्य समभूत् सिक्किमौकसा ।
मन्त्रिवरसमान्यस्त-राज्यभारेण भूभृता ॥ ४ । ●
तरसैव पशुप्राणा अतएवोपलक्षतः ।
मूढ़ा वह्निं व्याप्य लुब्धाः सिक्किमवासिनः ॥ ५ ।
अथ ब्रिटनराज्यस्य पार्ष्णिदेशेषु चक्रिरे ।
प्रजानां मर्म्मभेदादि दृश्यं कर्म्म भूयशः ॥ ६ । ●
विक्रीता दासवद्भुक्ता: कारायां मथवा क्षति ।
रंघसाथ धृताक्रान्ता ब्रिटनीयप्रजाश्च यैः ॥ ७ ।
दूरं वाचिक माकर्ण्य सर्पाः शीर्षोद्धता इव ।
मान्या ब्रिटनपक्षीया राजामात्या मनस्विनः ॥ ८ ।
निजान्यङ्गानि नीतिज्ञा खलयन्तो मुहुर्मुहुः ।
क्रोधारक्तदृशो भीमाः प्रतीकारार्थं मुद्यताः ॥ ९ । ●
उदेयुर्यान् वीरदर्पे रारादिच्छासघातिनः ।
आनेतुं ब्रिटनामात्यैः खदोषक्षापनाय तान् ॥ १० ।

Digitized by Google

सम्राजो दण्ड मादातुं सम्प्रधारयतां मनाम्।
आदिष्टाः कर्त्तृपक्षीयाः सिक्किमस्य मङ्गलाभिः॥ ११। *
कस्यचिन्नामगेनाथ सदासोद्राजमन्त्रिनः।
भारः सिक्किमराज्यस्य शासनस्य करेऽर्पितः॥ १२।
वयसः परिपाकेन क्षीणबुद्धिपराक्रमः।
राजा शमसुखापेक्षी भोगतृष्णाविरागवान्॥ १३।
स चाम्बीनगरे दिव्ये निःशलाके प्रयापयन्।
जीवितस्यावशेषं हि वसतिस्थ सुसुक्षितः॥ १४। *
अन्वर्थो भूयति ज्ञात स्ततोऽसौ नामगेऽभिधः।
राजाध्यक्षः प्रजाद्रोही लोभी सर्व्वापराधभाक्॥ १५।
साम्राज्ये ब्रिटनेशस्य अधो दस्युजनोचितैः।
आचारैः पीड़यामास पर्य्यन्ते प्रजती चिरात्॥ १६।
यदा राजप्रतिनिधे र्हार्किलिङ्कस्थिता वुभौ।
तेन साम्राज्यसङ्कारौ कर्म्माध्यक्षौ यशस्विनौ॥ १७।
समाक्रान्तौ पिशाचस्य प्रमदीतौ च रंहसा।
विस्मृतं हि तदैवास्य नाम सभ्यसमाजतः॥ १८। *
बीभत्सानां मथो तेषां प्रायश्चित्तवदागसाम्।
श्रुतः सिक्किमराजस्य कियान् राज्यस्य वण्टकः॥ १९।
राज्ञ्या धीसचिवै र्दत्ति र्भारतस्यास्य वार्षिकी।
जीवतिस्थ यया राजा वञ्चना च तदावधि॥ २०।
दस्युजानां दण्डदानार्थं मेतेषान्तु यथाविधि।
आदेशो नोदितो रीत्या सिक्किमेशस्य सन्निधौ॥ २१।
सावज्ञेन मनाहत्य दम्भात्तदनुशासनम्।
न श्रुतं भारतेशस्य तं किञ्चिच्च तेन वा॥ २२।

दत्तार्घो सोऽपनीताभिः प्रजाभिर्मोघलब्धया ।
मन्त्रिवेश्मान्तिके प्रोषुः सम्पत्त्या भारतस्य च ॥ २३ ।
आसनायापराह्णानां वन्दिनां सुक्षयेऽथवा ।
तस्य प्रत्यर्पणायैव सुषितस्य धनस्य वा ॥ २४ ।
स कर्मसचिवो राज्ञः सिक्किमस्य न वक्रधीः । .
चक्रे चेष्टां दुराचार चञ्चलात्मा च कञ्चन ॥ २५ । ●
अवदानस्य पापस्य भुव मेतस्य कर्तृषु ।
सचिवस्यास्य आमाता राज्ञो सुख्यो हि नायकः ॥ २६ ।
खष्टाब्देऽष्टादशशत-माने सोमरसाधिके ।
नवेम्बराख्यमासस्य शीतस्य प्रथमेऽहनि ॥ २७ ।
वक्रधास्तु निर्देशेन काम्बोजोऽसौ महामनाः ।
प्रतस्थे सिक्किमं जेतुं सैन्यै रत्यल्पकैः सह ॥ २८ ।
प्रविश्य सिक्किमं योधाः सांयुगीना महाबलाः ।
प्रत्यूहं नाभ्यमित्वीणाः शत्रुभ्यस्ते समाययुः ॥ २९ ।
सुसुत्सूं स्फेतकायां स्वान् विद्विष स्तत्रवासिनः ।
अथ प्रत्युद्ययुर्भक्त्या वर मभ्यागतानिव ॥ ३० ।
काम्बोजोऽपि विना विघ्नात् सुयोगं प्राप्य नीतिवित् ।
प्रदेशं वशमानेतुं वभूव तमसौ कृती ॥ ३१ ।
खञ्चयित्वा तु काम्बोजं बले रक्षित मल्पकैः ।
दुर्धिया सचिवेनैनं दूरीकर्तुं कृता मतिः ॥ ३२ ।
मिलित्वा स ततः सार्द्धं कियद्भिः भूटसैनिकैः ।
काम्बोजस्य बलात्तस्य निवेशं नाममेऽभिधः ॥ ३३ ।
ते च भूटसमुत्पिन्ना मिलुन्ना शत्रुसैनिकैः ।
पलायाञ्चक्रिरे किन्तु सुहृत्कर्मेन कृतोद्यमाः ॥ ३४ ।

दूंलण्डीया: समाक्रान्ता: पुन स्तत्परवासरे ।
सिक्किमस्य ससैन्येन महामात्रेण पूर्ववत् ॥ ३५ ।
योधै रित्थ मभिच्छिन्ना: शत्रूणां त्रिटनौकसाम् ।
आङ्गोपुङ्गविकाघोषै रसल्लङ्कं भूटवाहिनी ॥ ३६ ।
अथ सानुशय स्तस्य मासस्य खलिमे दिने ।
कृतेऽहो नामगे-नामा सोऽपक्रान्तो रणाङ्गनात् ॥ ३७ ।
वीरभोग्या जयश्रीश्च प्रसक्ता गुणसम्पदा ।
आस्थिता वारयोषेव काम्बेलस्य भुजान्तरे ॥ ३८ ।
किन्तु युद्धसमर्द्धाणां स वसूना मसत्तया ।
यौवनं न चिरन्तस्या: शक्तो भोक्तुं मम्मदलम् ॥ ३९ ।
यदि पूर्वपति स्तस्या: पुनस्तं तोक्ततीक्ष्ण स: ।
आयङ्क्षेति सुयोगैषी दूर्णं प्रत्याययौ तत: ॥ ४० ।
अमी तस्यानुयानार्थं विद्विष: सिक्किमौकस: ।
कश्चिद् विदधिरे नैव यत्नं वा योद्धुमिच्छया ॥ ४१ ।
असौच नामगेनामा श्रुत्वा हर्षमुपागत: ।
तत्प्रयाणसमाचारं कान्दिशीक: परं तत: ॥ ४२ ।
दूरीकर्त्तुं दार्जिलिङ्गा द्दुराशा महती लता ।
सचिवेन बलेनैतान् त्रिटनीयान् वरीयसा ॥ ४३ ।
तेऽथ सीमा मतिक्रम्य सर्व्वे सिक्किमवासिन: ।
वन्या त्रिटनराज्यस्य सैन्या युद्धाय सज्जिता: ॥ ४४ ।
विद्वान्त वैरुधाजन्यं जनयन्ति स्म भारते ।
पिशुना दस्युवृत्ता हि नृशंसं लोकगर्हितम् ॥ ४५ ।
तदा हैमवते देशे जगाम वायुसेवनात् ।
राजप्रतिनिधि र्मान्य: कानिङाख्यो महाशया: ॥ ४६ ।

निशम्य नामगेमाख्यो दुर्वृत्तिं नरधर्षणीम्।
तस्यासौ दमनायाशु प्रादिदेश यथाविधि ॥ ४७ ।
शक्ति र्हि भारतेशस्य महती लोकविश्रुता ।
सर्व्वत्राप्रहता तस्मै दातुं शिक्षा अलंभवेत् ॥ ४८ ।
साङ्गान् योधान् समादाय षड्विंशतिशतान्मितान्।
कर्त्तुमायोधनं घोरं गयोलारो महाबलः ॥ ४९ ।
सिक्किमाख्यं दार्जिलिङ्गा दभिसर्त्तुं ससैनिकः।
अथ सध्वत सेषां राजधानीञ्च विद्विषाम् ॥ ५० ।
पृतनानायको भूत्वा रणवेद्दविशारदः।
आदिष्टः कानिङ्गाख्येन महामात्येन धीमता ॥ ५१ । §
तत्र कर्म्म समाधातु मिङनो राजनैतिकम्।
नियुक्तो भारतेशस्य स दूतः सुविचक्षणः ॥ ५२ ।
एव मस्योपदेशार्थं विधानानि कियन्ति च।
वक्ष्यमानानुरूपाणि निर्दिष्टानि महात्मनः ॥ ५३ ।
असदाचारपापस्य सिक्किमप्राप्तजन्मनः।
निदानोच्छेद आधेय स्तेन प्रथमतोऽस्यहि ॥ ५४ ।
अथय स्थापनेतव्यं सिक्किमोदृङ्नावसम्भवम्।
काम्बलेन कृतं घोर मिंखण्डस्य हितेयत: ॥ ५५ ।
महती सिक्किमामात्य-हृदयोपलतोरणे।
आलेख्योर्ज्जस्विनी शक्ति र्ब्रिटनस्य तृतीयत: ॥ ५६ ।
सिक्किमस्य महामात्यो दुर्बुद्धि र्नामगेऽभिधः।
बलाढ्यो बन्दिवत्प्रेष्यो राजधान्यां चतुर्थतः ॥ ५७ ।
निपात्य स्वपदाद्देनं कुर्य्यीतास्य दुरात्मनः।
मनु निर्व्वासनं देयात् सावमानं बलक्षिनः ॥ ५८ ।

सिक्किमाधिपतिं सम्यग् ज्ञापयेदिति वच्चवम्।
नाधिकर्त्तुं लालसाके राज्ञा नो राज्यमीदृशम्॥ ५८।
फेब्रुयारीसमाख्यस्य मासस्य प्रथमे दिने।
ससैन्योऽसौ गयोत्तारो बुयुत्सु खल्व वत्सरे॥ ६०।
दार्जिलिङ्गादिघायाय वनग्रैलपथेन हि।
राजनीतिविदा साक मिडनेन महात्मना॥ ६१। ●
मार्चसंज्ञस्य मासस्य सूरसोमप्रमेऽहनि।
सिक्किमस्य राजपीठे तामलुङ्के उपागतो॥ ६२।
गहनां वर्ष्मरावासा मरण्यानीं सुदुर्गमाम्।
तुहिनाच्छादितानुच्चै-र्भीमसर्पिगिलोच्चयाम्॥ ६३।
पथि शैवलिनीं दिव्यां शैलभाखललामवत्।
निःसेतुकां सुदुस्तीर्णां मामतः समतीत्य तौ॥ ६४। ●
विभ्रमः सततं नृणां दुर्गमं सिक्किमौकसाम्।
वेष्टुं कोऽपि न शक्नोति तद्राज्यमिति शत्रुवत्॥ ६५।
कठादिंराजवाहिन्या ऊर्ज्जस्विन्या भयातुराः।
श्रुत्वागमनसमाचार मग्नेःपातसन्निभम्॥ ६६।
दुर्गगोपुररक्षायां प्रतीहाराः क्षणन्तदा।
हृताः सिक्किमभूपस्य आसन् चित्तार्पिता इव॥ ६७। ●
द्वादशे मार्चमासस्य दिने दूरं असैनिकाः।
प्राविशन्नय निर्व्याधं तामलुङ्काख्यपत्तनम्॥ ६८।
प्रकाश्य मिडनो भूप न्तत्पराहे ददर्श सः।
लामादिभि र्लोकवर्य्यैः सिक्किमस्य समन्वितम्॥ ६९।
पूर्व्वं मेवापवातोऽसौ स्वदेशाद्वामगेऽभिधः।
भीत्या साम्नः सुयोगस्य जातः प्रस्तावितस्य तत्॥ ७०।

राज्ञा वर्षीयसा पुत्रः सभृतः शान्तिमिच्छता।
विविक्ते सर्व्वसम्मत्या निजसिंहासने तदा। ७१।
दिने रसार्कमेऽसुथ्य मासस्य सिक्किमाधिपम्।
कुडनोऽभिनवं धीमान् ददर्शोपांशु तं पुनः॥ ७२।
स्वीचकार तदा राजा विधातुं कर्म्म तादृशम्।
येन स्याद् ब्रिटनेशस्यैः परितोषो यथाविधि॥ ७३।
षड्विंशवासरे तस्य मासस्य अवनिस्थनम्।
पञ्चहयैकमत्येन सन्धिपत्रं नवीकृतम्॥ ४७।
प्रसादोत्फुल्लनेत्राणां प्रासादस्योपकण्ठतः।
प्रत्यक्षं सर्व्वसैन्यानां लिखितं पठितञ्च तत्॥ ७५।
अधीनदेशपालानां सामाद्दीनां समीपतः।
तस्यानुलिपयः सद्यः प्रेरिता दिक्षु सर्व्वतः॥ ७६।
विधयः सन्धिपत्रोक्ता विग्रहार्थाश्च नाप्रियाः।
आतास्ते सिक्किमेशस्य नहि आत्मवधीरकाः॥ ७७।
दूरीकर्त्तुं दोषराशीन् इश्मिनोऽथ मतीश्वतः।
राज्ञा कारयितुं साकं भारतस्य च मित्रताम्॥ ७८।
कर्त्तव्यज्ञानमाधातुं कृहि तस्य शुभोत्तरम्।
दोषदः सन्धिपत्रस्य मातुर्यथास्य सर्व्वथा॥ ७९।
प्रजा यद् ब्रिटनेशस्यैर्व्वशाद्वन्दीकृताः पुरः।
सिक्किमीयजनेशासां सुधिताः सर्व्वसम्पदः॥ ८०।
तत स्राभ्यो धनं दत्वा यथेष्टं पर्व्वताधिपः।
कर्त्तुं स्वतीचकाराशा वेवं तत्क्षतिपूरणम्॥ ८१।
काम्बे तस्य प्रयाणेन सन्नातोऽपचय स्तत:।
निरधायि धनैः सोऽपि पूर्य्यः साधारणो तु यः॥ ८२।

एतेनैव विधानेन वाणिज्यस्य तदावधि।
सागरं तत्पुरद्वार-मुन्मुक्तं युगपच्छुभम् ॥ ८३।
अध्वन्यापणिकानाञ्च यातु बाधा गमागमे।
तत्रासीत्पुरतो राज्ये सा सर्व्वैव लयंगता ॥ ८४।
उभयो राज्ययो र्मध्ये यातायातात्ततःपरम्।
वणिज्यावस्तुजातानां राजशुल्को गुरूकृतः ॥ ८५।
जनसञ्चरणार्थञ्च पथो निर्म्माय नूतनान्।
विना लक्षाद्विपक्षेण सदुपायः कृतोऽनिशम् ॥ ८६।
आविसह्यप्रहारार्थं सिक्किमाधिपतेः खलु।
मन्त्रिनिर्व्वासनार्थञ्च सुविधि र्विहितोऽपरः ॥ ८७।
दूडनो राजनीतिज्ञः कर्म्मात्र विदधे तदा।
सुधीः स्वाधीनबुद्धा च सुमनोवृत्तया सह ॥ ८८।
अथचोर्ज्जितनानान्तु नानुज्ञाः कर्म्मचारिणाम्।
सुविवेकवता तेन कथमप्यवधीरिताः ॥ ८९।
दुर्दान्तानां मसभ्यानां चीनतातारवासिनाम्।
नैवेष्टो ब्रिटनेशस्य यत्संश्लेषः कलङ्कवत् ॥ ९०।
कानिङ्गाख्यो महामान्यो लर्डोपाधिविभूषितः।
सिक्केताभिनवं देशं नाधिकर्त्तुं ममीहयम् ॥ ९१।
स्वकीयदूत्यकार्य्यस्य समालोच्य फलाफलम्।
दूडनेन निजेनैव मतमित्थं प्रकाशितम् ॥ ९२।
न नः सिक्किमराज्यस्य प्रदेयमपि कञ्चन।
लाभसाध्यासतः कर्त्तुं पादप्रकृतिसन्धितम् ॥ ९३।
आदेया ये मया प्राप्ता आदितोऽस्यैव कर्म्मणः।
ततोऽहं हातुमाप्तांशं संयुक्तोऽभवमीहयम् ॥ ९४।

Digitized by Google

विश्रम्भं वाचु मे ज्ञात्वा पार्ष्णिग्राहा नराधिपाः।
प्रत्यक्षान् हेतुनानेन निरस्ता अस्त्रधारणात् ॥ ८५ ।
यतो नेपालभूपाल चीनराजबलिप्रदः।
महीध्रयोर्षभूषेव तद्विध स्त्रिव्रताधिपः ॥ ८६ ।
अन्यो तिब्बतभूपाय भूटानसिक्किमेश्वरौ।
भागधेयं यथारीति दिशतोऽनुगतौ च तौ ॥ ८७ ।
अतश्चीनस्य सम्राजो निम्नौ तौ करदौ नृपौ।
ग्रस्तदाम्नावजौ स्यातां पौत्रौ पितृपितु र्यथा ॥ ८८ ।
जानन्ति स्म स्फुटं नो चेदिति पूर्वं नरेश्वराः।
नोऽधिकारेऽभिलाषो नो राज्यस्य सिक्किमस्य हि ॥ ८९ ।
न जाने न कथं कुर्युः संहताः परतः स्वतः।
विरुद्धाचरणं सन्त स्ते नो विद्वेषबुद्धयः ॥ १०० ।
अनेनैव प्रकारेण दूतलत्य मसीसधत्।
अथ प्रत्यागमाय मिडनः सुयशोऽन्वितः ॥ १०१ ।
स राजस्वविभागस्य सम्पादकपदे पुनः।
आरेभेऽधिष्ठितः कर्म्म संविधातुञ्च पूर्ववत् ॥ १०२ ।
पञ्चर्त्वधिकसप्ताब्दे योऽष्टादशशतप्रमे।
अवारि वङ्गराज्यस्य सम्पादकपदे ततः ॥ १०३ ।
चकार कर्म्म वर्षाणि दश तत्र जनप्रियः।
क्षिप्रदक्षं यथान्याय मिडनो बुद्धिमत्तया ॥ १०४ ।
विचक्ष्य विदधे विद्वान् स्वकार्य्यं स यथानियम्।
वीक्ष्यते तद्विधः स्लोको भूभृतो भूतकेष्विह ॥ १०५ ।
तदा सौ वङ्गशासृणा मभूद्विद्वत्सभाजनम्।
सेसीलविडनाख्यस्य विशेषान्निजकर्म्मणा ॥ १०६ ।

कृतानि यानि कर्माणि तदानीं बङ्गशासृभिः।
शुभाशुभानि राज्यस्य नीतिविद्भिर्यथा स्वयम्॥ १०७।
दूडनस्य न तत् कर्त्तुं मयक्षेपं स्तुतिं नु वा।
यत्नोऽहं नेति यद्देह्मि संक्षेपोऽस्य क्रियानिह॥ १०८।
साक्षजा-बङ्गभूमिस्तु पुरा यत्नुनिपीड़िता।
माता पत्येव तेनेयं सती विघ्नात् पदे पदे॥ १०९।
सम्भृतः सोऽथ सकलपण्डितो देशपालः प्रवर्त्तो,
द्वीपेष्वर्य्या सुमतिरधिष्ठते ब्रह्मराज्ये विशाले।
पादोन्नत्योन्नतिमिह समगात्तस्य नृणां प्रमोदो,
यस्मादस्य प्रभवति कृत अनानन्दसन्दोहदोहा॥ ११०।

इति श्रीमद्दिडन-चरिते तृतीयः सर्गः।



चतुर्थः सर्गः ।

अष्टादशशतोपेते सप्ताब्दे विरसप्रमे ।
पुनर्भटानराज्ये च स दूत्याय प्रचोदितः ॥ १ ।
न केनाऽव ज्ञती जात उपायेनोपयाय यत् ।
दुष्टनीतः समाक्रान्तः शत्रुभि र्विघ्नकर्तृकैः ॥ २ ।
चकर्ष ते खलःमान स्खिन्नौपलोष्ट्रवत् ।
परिकल्पितकुत्सौघान् यूथपे बालका भयम् ॥ ३ ।
स तु सत्यपरत्वेन मौनीभूय न केवलम् ।
तितिक्षते स्वबन्धूना मपि कर्म्म नयच्युतम् ॥ ४ ।
समपाहृतवृत्तित्वात् स्वातन्त्र्यान्मनसश्च सः ।
राजभर्म्मभृता मत्र बभूवाप्रीतिभाजनम् ॥ ५ ।
विद्वेषो विषवत्तेषां हृदये पदमातनोत् ।
दृश्ये क्रया हृश्या स ते विसदृश्ये जने: ॥ ६ ।
ते च रन्ध्रचरास्तस्य चरिते चलचेतस: ।
यथावकाश सुत्याय निर्म्मले परिपन्थिन: ॥ ७ ।
दोषमारोपयाञ्चक्रु रोषेणासुग्धचेतना: ।
लोलापे तन्तुभं दीर्घं विषाणे निस्तले यथा ॥ ८ ।
न सद्वेरवसाफल्यं कदापीप्सितकर्म्मसु ।
स्वनिर्म्मन्थपरा लोका ह्रौलण्डीया: स्वभावत: ॥ ९ ।
निष्फलं भटराज्ये च दूतकार्य्य मजायत ।
वज्रयत्नाचित.पीठं यद्वैव लघिरूपरे ॥ १० ।

आसेविष्ट स एवात: कलङ्कमिडन सदा ।
जगदं भजते यद्व-देकस्यामयतोऽपर: ॥ ११ ।
आसीच्छीरामपूरस्य वार्त्तापत्रप्रकाशक: ।
द्विषतामग्रणीस्तस्य सदानिर्व्वादवादिनाम् ॥ १२ ।
खटाब्देऽष्टादशयुत-युक्ते रोपर्त्तुसम्मिते ।
पार्लेमेण्टसमाख्यायां मङ्कत्यामेव संसदि ॥ १३ ।
दौत्यमेतदथालोच्य दोषानत्र गुणानपि ।
दृढा सामाजिकै र्मुक्त: कलङ्कादिडन स्वत: ॥ १४ ।
तत्सन्देशहरस्यास्य कार्य्यं यद्यर्थतां गतम् ।
हेतुरस्य समीचीन दूड पश्चान्निगद्यते ॥ १५ ।
दूडनेन नात्र तादृग् यथा पूर्व्वमभीप्सिता ।
जानद्वारेनृसंसस्य समाप्राप्तानुकूलता ॥ १६ ।
राजप्रतिनिधेरेव भारतस्य महीयस: ।
अभूदनवधानत्वाद् विकृतं फलमीदृशम् ॥ १७ ।
न शासनविधानानि भूटराज्ये तु कानिचित् ।
सन्ति राज्ञानुविष्टानि तत्रैवेति च कारणम् ॥ १८ ।
राजनीतिविदा पूर्व्वं मतस्तेन महात्मना ।
परभाग: समालम्ब: सिक्किमे दूतकर्म्मणा ॥ १९ ।
प्रणियुक्तोऽतएवासौ लर्डाख्यानमहोदयै: ।
पुनर्दूतपदे मान्ये यातुं भूटेश्वराज्यत: ॥ २० ।
वस्तुतोऽपि विना तेन कर्म्मणोऽस्यान्तरायिण: ।
कश्चित् सम्पादनायासी-द्यार्ह एक सदा जन: ॥ २१ ।
दूडमेव महद्दु:खं यत्नेनाधिगतं न तत् ।
समाधातुं यथादेशं साधनं कार्य्यमात्मन: ॥ २२ ।

नापेक्षिता राजनीति र्धिषणोद्यनसोऽत्र वा।
यथा हिषद्दर्पहरं दृग्यलं दृतनाबलम् ॥ २३।
अतःपूर्व्वं सुपायैर्यैः सिद्धार्थः सिक्किमेऽभवत्।
दूडनो राजनीतिस्तु तेषामन्यतमोऽवरः। २४।
आग्नेयायुधजातानां आतानां त्रिटनादुत।
निदानभूत मत्रैव भीषणानां प्रदर्शनम् ॥ २५।
विधानानञ्च मन्यच्च यतस्तदुपवर्ण्णनम्।
साम्नः संसाधने अत्र दोहद स्तत्रवासिनाम् ॥ २६।
भूटानदूतलक्ष्ये तु समभूत्तदुपाश्रयः।
सदा साधनशीनेऽपि सुतरामत्र सर्व्वथा ॥ २७।
नोद्दितोर्ज्जस्विनी तत्र त्रिटनीया न वाहिनी।
स्कन्देन वेपथुमती यस्या भवति मेदिनी ॥ २८।
नाक्षीद्राजानुशिष्टा च काचिच्छासनपद्धतिः।
नेति चित्रं यतस्तत्र सर्व्वेषा विफलाभवत् ॥ २९।
राजनीति र्न ये मूढाः प्रजानन्तीति वस्तु किम्।
दृप्तियेषां बलात्कारः परेषां कोषमोषणम् ॥ ३०।
स्वदेशस्य हिते ये च निराशा निश्चताशयाः।
विद्याविक्तविहीना हि कौटिल्याः शवरा ध्रुव ॥ ३१।
तेषामपसदानाञ्च भूटानस्य भयेष्वहो।
वागुरावन्धयत्नेषु भारः शिष्टैः समर्पितः ॥ ३२। §
राज्यस्यास्य गते तेषा मिव मित्रे सवेशतः।
किं सन्देशहरे किञ्चि दुवेद्राजन्वतः फलम् ॥ ३३।
शार्दूला वश्य मायान्ति दण्डेनापि विना वने ?।
श्वानोऽप्यनुभवन्तीह पादाघातःहते सुखम ? ॥ ३४।

दूतानां नयदक्षाणां भूमौ भूटानभूपतेः।
नोदितानामतश्चेष्टा अभीक्ष्णं व्यर्थतां गताः॥ ३५।
लोकर्तुमाने खटाब्दे वसुसोमशताम्बिते।
चित्वन्तदिति यद्भूतो ज्ञात्वात्र प्रेषितः पुनः॥ ३६।
संसाधयितु मायात मिङनेनानुशासनम्।
यदत्र दूतकृत्यं त-दानुपूर्व्याभिधीयते॥ ३७।
साम्राज्ये भारतेशस्य यथा कोचविहारतः।
मैत्रीगुणसनद्धस्य सिक्किमेशस्य राज्यतः॥ ३८।
क्रियते कति वर्षाणि प्रजाभि र्भूटभूभृतः।
अनिष्ट मसकृद्घोर मनूनजनघर्षणम्॥ ३९।
ततो ब्रिटनभूटान-राज्ययोरधुना द्वयोः।
सम्बन्धः पर्व्ववेक्षस्य परिवर्त्मा पुरातनः॥ ४०।
ज्ञाता भारतवर्षस्य प्रीतकर्त्तौ परवर्त्तिनि।
भूटानेशसमीपेषु तदिदानीं महीयसा॥ ४१।
दूत्ये भवन्तमायुज्य प्रहेतुं प्रहृतं मनः।
नान्य मेतत्समाधान-क्षमं बीक्ष्य विचक्षणम्॥ ४२।
यदा प्रत्युक्तमचायं क्रमेण परिणत्स्यति।
प्रदातव्यं तदा यत्नाद् यथायोग्यं प्रदेयनम्॥ ४३।
दुर्म्मनोदेवराजाय धर्म्मराजाय धीमते।
प्रयाणं भवतो भूटे तावावेद्य ममार्थिनः॥ ४४।
वृथंसाचारसम्भार-द्योतकानि प्रमृज्य च।
पतानीह वहन्त्यास्तु: सकाशाद् भूटवासिनाम्॥ ४५।
भवता भावयित्वाथ तेषां प्रतिक्षिपीः पुनः।
दूत्यन्तरेच तात्पर्य्यं स्वयं ज्ञेयं विशेषतः॥ ४६।

सर्व्वमेवावगन्तव्यं यदत्र स्यात् प्रयोजनम्।
सदैव वङ्गराज्यस्य कार्य्यसम्पादनाशये ॥ ४७।
वक्ष्यमाणनिदेशानां सतात वशवर्त्तिना।
गुरूपोद्घातसंसिद्धै विधेया भवता क्रिया ॥ ४८।
स्वतन्त्रीभूय सामान्ये किन्तु कर्म्मणि केवले।
चलिष्यति भवानित्थ मात्मलक्ष्यपरायणः ॥ ४९।
अष्टादिफल्गुकोटाख्यं स्थलं यद् भारतेश्वरी।
समाप्तभागधेयन्तु स्वाधिकारं समानयत् ॥ ५०।
निबोध्य भवता भूपं भूटस्य स्फुट मस्य हि।
मित्रवत् कारणं गूढ़ं समाप्या प्रथमा स्थितिः ॥ ५१।
पुपूरे भूटपतिना भूदारगतिना कथम्।
न तर्हो भारतेश्वर्य्या वक्तव्यमिति तत्र च ॥ ५२।
गुप्तमेव स्वकीयेन प्रदेशोऽधिकृत स्वया।
वर्त्तते वस्तुतस्तस्याः सनिर्म्बन्धात्र नो मतिः ॥ ५३।
भूटीयै र्भग्नभागा ये वन्यै र्वन्दीकृता बलात्।
देवराजसमादिष्टै र्दस्युकल्पै र्दुराशयैः ॥ ५४।
सर्व्वे संरक्षितसर्व्वस्वाः सदाशङ्कितमानसाः।
बलवद्भि र्विना विघ्नं यथा ते मुक्तिमाप्नुयुः ॥ ५५।
सम्पदः प्रतियच्छेयु र्यैर्यैषां पर्व्वतौकसः।
प्रग्रहाश्चास्य वा सृष्टाः कर्त्तव्यं भवता तथा ॥ ५६। §
विहृति र्नौदनीयैषां वङ्गराज्यसमीपतः।
कृतानामथ वित्तानां वन्दीनां नामसंयुता ॥ ५७।
भूटेशो भारतेश्वर्याश्चेत् पृणीयाच्चानुशासनम्।
अष्टादिफल्गुकोटाख्यं प्रदेशं सापि न त्यजेत् ॥ ५८।

यद्यपौ फक्कतो राजा सोऽत्र नः सुमनायते।
प्रस्तावे भविकोदर्के न्यायबुद्धिविभाविते ॥ ५८।
भवानिति विशेषेण प्रष्टा तं भूभृतं तदा।
अपि वारयितुं शक्तः प्रभुशक्त्या न सोऽधवा ॥ ६०।
पशुप्राणाः शवोपायाः स्वप्रजाः स्वीयया सदा।
अलक्ष्याक्रमणात्तासां स्तेनानामिव भाविनः ॥ ६१।
पुरा जराजसाम्राज्ये वैजयन्तीजयोत्करे।
आश्रिते पार्ष्णिराज्ये वा ननु तन्मित्र-रक्षिते ॥ ६२। ¶
निर्देशावसरयाक्षाक्ष मनिष्टं जायते च यत्।
कर्त्तुश्चेद् भूटभूमीयः पारयेत्तत्प्रतिक्रियाम् ॥ ६३।
अष्टादिक्षकोटाया सदा शासनकर्म्मणः।
यावत्कालं जगन्मान्या भारं वै भारतेश्वरी ॥ ६४।
अक्षालमक्षणे पुण्ये स्वकरे धारयत्यसौ।
भागधेयं नृपस्तावत् प्रतिवर्षं समाप्नुयात् ॥ ६५।
कार्षिकान् किमयैलक्ष्यः सक्षयुगमान् किल सः।
प्रत्याहृत्य तृतीयांशं समष्टि मथवा वले: ॥ ६६। ¶
वङ्गराज्यात् समादत्ते भूयिष्ठ मथ तै भवान्।
भ्राम्यतीति यथारीति पत्रैः सुलिखितैः स्वयम् ॥ ६७।
भारतेयोविहारेय-प्रजात्वाचारसञ्चयः।
भूटानकर्त्तृपक्षीय-जनासम्मीतिकारणम् ॥ ६८।
ब्रूयतां देवराजश्च धर्म्मराजो मनोज्ञता।
दोषां स्तासां समाख्यातुं सप्रमाणान् यथायथम् ॥ ६९।
प्रजानां भवता याभिः प्रविद्धाः प्रागतो जनाः।
विविधेन विधानेन ग्रस्तद्दु भूटानवासिनः ॥ ७०। ●

यदि केतति कर्त्तव्यो भूपति र्भवता तदा ।
तत्त्वमस्यानुसन्धाय प्रतीकारो यथाविधि ॥ ७१ ।
दूंराजाधिकृते राज्ये ये वा भूटेश्वरक्षिते ।
कदाचिदथ दुर्वृत्ता भवितारः कृतागसः ॥ ७२ ।
निधेय एको दण्डाय तेषान्तु भवता विधिः ।
विच्छ्यैव विशेषेण व्यवहारविदा वरः ॥ ७३ ।
भवता भवितव्यन्तु सावधानेन सर्व्वदा ।
कर्म्मणोऽस्य समाधाने दुःसदस्य शमार्थिना ॥ ७४ ।
अवैतीति भवान् पूर्व्वं विचाराचारमध्यगम् ।
द्वयो र्व्रिटनभूटान-राज्ययोः कियदन्तरम् ॥ ७५ ।
तयो र्विषमयोरैक्यं भवेत् कथमतः खतः ।
सज्ये धनुषि कृष्टे हि नास्ति सरलः शरः ॥ ७६ ।
दायदण्डविचर्च्चाया भूटाने न तथा प्रथा ।
यथा व्रिटनसाम्राज्ये राजन्यति पनाचिता ॥ ७७ ।
समर्प्या शासनार्थञ्च भवता येऽपराधिनः ।
दण्डार्हाः स्यु र्यथा यैस्ते दोषव्रातै र्दुराशयाः ॥ ७८ ।
तथा तद्दिशति खल्व विद्यते हि विशेषतः ।
दूंराजराज्यसंसार-प्रचरे दुष्टदुर्भरे ॥ ७९ ।
अष्टादशशतातीत-वर्षबाणप्रमस्य तु ।
सिन्धुसंख्ये दण्डविधौ खष्टसंवत्सरस्य च ॥ ८० । §
प्रजासेदु भारतेशवर्य्या भूटाने प्रवसन्ति याः ।
तत्राहन्दीकृता दोषा-नृपः प्रत्यर्पयेच्च ताः ॥ ८१ ।
भूटीया येऽत्र दण्डार्हाः केतयन्ति कृतागसः ।
निष्कृतिं नैं कथं कार्य्या तदा तेषां तथा तवा ॥ ८२ । ●

Digitized by Google

एतद्व्याख्यान्तरेकाचि-द्यदि मन्तुं चरेद् गुरुम्।
भूटभूपप्रजा तस्य विचार मपि चेत् पुनः॥ ८३।
धर्म्माधिकरणे राज्ञा ननु कारयितुं भवान्।
राजनीत्या प्रयत्नोति चानुमोदान्मतीभुजः॥ ८४।
सर्व्वाङ्गसुभगं भव्यं यथास्यं जायते तु तत्।
पदे पदेऽत्र प्रत्यूहः कण्टकः कमले यथा॥ ८५। §
निःस्वार्थमनिशं कार्य्यं धर्म्माधिकरणेषु नः।
यथा भवति सन्न्यायं विधिधर्म्मविशोभितम्॥ ८६।
अध्याहारं शैलराजः कञ्चनात्र करिष्यति।
न ग्राह्या भारतस्येति मन्यते हि मतीयसा॥ ८७।
मानसे भूटराजस्य प्रभवेदपि चेद् भवान्।
सत्प्रवृत्तिं समाधातुं तस्यैव शुभसिद्धये॥ ८८।
राज्यं शमगुणोपेतं भविता च भवां स्तदा।
सन्तुष्टा भारतेयी च राजप्राभृतसम्भृतः॥ ८९।
वर्षे सोमरसातीते चाष्टादशशतप्रमे।
षष्टीये सिकिमेशेन सन्धिपत्र मकारि यत्। ९०।
तस्मिन् त्रिटनराज्यस्य पार्ष्णिग्राहप्रदेशतः।
तेनाजनयितुं कर्षि नाजन्य सुररीक्षतम्॥ ९१।
आधाय प्रतिशुश्राव मध्यस्थां त्रिटनेश्वरीम्।
कर्त्तुं यः पार्थिवे रेतै र्विवादस्यापि भञ्जनम्॥ ९२।
परवान् त्रिटनेश्वर्म्मा सन्धिदैव स्वकीयया।
ननु कोषविहारेशः शक्तः कर्त्तुं न तत् स्वयम्॥ ९३।
निर्यातन मरातीना मवधाद् चते कथम्।
शक्तिग्राह्यं सशक्त्या स्वस्याः शत्रुवशोद्विषः॥ ९४।

भणेदिति भवान् भूपं भूटस्य स्फुट मग्रतः ।
यथा राज्यहृयं निम्नं विद्यते तदवस्थया ॥ ९५ ।
कठेन भूटराजेन कृत मेतदभिग्रहम् ।
अभिलविहितं कृत्यं मन्येत विटनेश्वरी ॥ ९६ ।
यदि तस्य मनोऽनैक्यं विप्रलम्भोऽथवा महान् ।
विचारसिकिमेधाभ्यां बलवद्भ्यां ते समम् ॥ ९७ ।
अमात्यै र्विटनेश्वर्या नीतिविद्भि र्महाशयैः ।
तस्य भावयितुं तावद्भूटेशोऽर्हति भञ्जनम् ॥ ९८ । ●
तेऽपि तां प्रविधास्यन्ति क्रियां न्यायानुसारतः ।
स्वभावतो हि ये शश्वत्-सत्यपक्षावलम्बिनः ॥ ९९ ।
सन्धिपत्रप्रकारेण भवतास्य फलाफलम् ।
निरूपेयं हि दूत्यस्य राजनीतिविवेकतः ॥ १०० ।
पाण्डुलेखं मया दृष्टं यथैतत्त्वामकर्म्मणि ।
नातिगच्छेद् भवान् जातु तद्दत्तां शासनावलीम् ॥ १०१ ।
स्वल्पेषु विषयेष्वत्र विधेया निजया धिया ।
कृति श्चिन्तितयाभीष्टं राज्यमङ्गलकाम्यया ॥ १०२
दूतनं प्रादिदेयेत्वं राजप्रतिनिधिः स्वयम् ।
निर्वोढु मात्मनः कृत्यं निरवग्रहमानसम् ॥ १०३ ।
समाप्त स्तेन यस्यैव भारः कार्य्यस्य चेदृथा ।
धातुरम्भ इव स्वल्पात् समवस्यंस्तेऽल्पधीः । १०४ ।
अधिक्षेप स्तदा तस्य गुरुः शीर्षेऽधिरोक्ष्यति ।
अकृतार्थतया यत्तु प्रागुक्तं तदभावतः ॥ १०५ ।
नेच न्यायपथातीता आदेशा न तथाधवा ।
विचारयन्तु विद्वांस दूति सर्व्वार्थदर्शिनः ॥ १०६ ।

नेच्छामो गदितुं नोऽत्र मत मेतर्हि साम्प्रतम्।
गुणो दोषो मनुष्याणां स्वत स्वाद्द चकास्ति हि ॥१०७।
यद्यसौ दूतकार्य्यस्य नाभविष्यत्तु सिद्धये।
याचा भारतराज्यस्य प्रेरित: परवानिव ॥ १०८।
नालगिष्यद् विपज्जाले तदा सन्नपि बुद्धिमान्।
मग्ना चणाल माहर्तुं करिणीव निषद्दरे ॥ १०९। ●
जग्नाविति यदा श्रुटे याचो राज्ञा न सादरम्।
पुनाचान्तं पुर:स्थत्य विदधे साधु नेडन: ॥ ११०।
पृत्युक्ता भारतेश्वर्य्या अमात्या स्तस्य सर्व्वेषि।
दोषमारोपयन्तिस्म ये हिषोऽवसरोचितम् ॥ १११।
बलवच्छत्रुसेनाभी राजा कश्चित् पराजित:।
क्षीनशक्तितया वापि स्वीयया सन्धि मिच्छति ॥ ११२।
विभेति भारतेश्वर्य्या: प्रतापात् स यथूपम:।
अयं श्रुटपति: क्षीण-रणाश्वानीकिनीबल: ॥ ११३।
मनसीति हि विश्वस्य समीहा मत्र सन्दधे।
राज्यस्य कर्त्तृपत्नीया: सन्धिसंस्थापने तदा ॥ ११४।
प्रजिघाय तथा दूतं यद्राजनीतिविक्तया।
अलमालोचनेनास्य निगूढ़विषयस्य तु ॥ ११५।
दूडनस्योपसंहर्त्तुं कर्म्म तद्विपदोऽगमत्।
ब्रवीमीति विशेषेण ननु या सन्निरन्तरम् ॥ ११६।
अष्टादशशतातीत-लोकर्त्तृप्रमिते च स:।
नवेम्बराभिधेमान्यो मासि श्रुटीयचायने ॥ ११७।
दार्जिलिङ्ग उपागत्य सञ्चिकाय यथाविधि।
निजकर्म्मोपयोगीनि ततो वस्तूनि डेडन: ॥ ११८। ●

Digitized by Google

पत्रं यल्लिखितं पूर्व्वं धर्म्मराजस्य सन्निधौ।
प्रतिघातमनासाद्य तस्य तं सोऽलिखत् पुनः॥ ११८।
अमात्यान् भूटराज्यस्य न्यापयामास विस्तरात्।
यस्मात्तत्र समायातः कारणादिदनः स्वयम्॥ १२०।
पत्रेणानुरोधाय स्थित्वा सीम्नि समुच्छ्रयः।
नेतुं निवेशवस्तूनि साच्चात्कृत्य मिथश्च तान्॥ १२१।
विज्ञात मिडनेनेति पत्रदानान्मनाक् परम्।
राज्यस्य मङ्गला काचि-न्नास्ति भूटप्रदेशतः॥ १२२।
डमरोद्भि मन्त्राघोरो योऽतःपूर्व्वं सुमूर्च्छ च।
जातराजकता तस्मा-त्तदा तत्रानुषङ्गिकी॥ १२३।
अध्यतिष्ठन्नवो भूपो राज्ञः सिंहासनं यतः।
विभक्ता हि मतानैक्या-त्तत्र भूटानवासिनः॥ १२४।
जनै स्तदेकपक्षीयै रपनीयातिधार्म्मिकम्।
प्रत्नं भूटपतिं नूत्ना देवराजः कृतः शठैः॥ १२५।
निगूढ़मिडनोऽप्यन्त-स्तत्त्वमस्यावगत्य सः।
शुभायामन्यत स्वीयं कर्म्म नैवातिबुद्धिमान्॥ १२६।
सोऽथ भारतयात्रारं पूर्व्वं कार्य्यप्रवर्त्तनात्।
वृत्तान्तं वेदयामास वरिष्ठ तद्विशेषतः॥ १२७।
स पुनः प्रत्यवादीत्तं राष्ट्रविप्लवकारिणः।
बभूवुः कृतकृत्यास्ते यदा पिशुनबुद्धयः॥ १२८।
पुरातन मपाकृत्य प्रोद्गान्नवशासनम्।
कृतसदा प्रजाभि र्यो भूटाने नूतनो नृपः॥ १२९।
विधातु मिति मन्येऽहं स्वपक्षं बलवत्तरम्।
प्रकार्य्या ब्रिटनेश्वर्य्या सह तेनैव मित्रता॥ १३०।*

Digitized by Google

निदेश मुपपद्येम मुदयुङ्क्ष्वेन स्वतः।
पुरःसर्त्तुं स्वकार्य्यस्य सिद्धये सगणः सुधीः॥ १३१।
चिवुल्लामाभिधः कश्चिद् भूटेशसचिव स्तदा।
चक्रार सत्कारिवं तस्य प्रस्थितिकर्म्मणि॥ १३२।
आसुयारीसमाख्यस्य मासस्याद्यप्रमेऽहनि।
दार्जिलिङ्गं परित्यज्य पुरतः प्रययावसौ॥ १३३।
स सार्द्धसप्तगव्यूतीनतिक्रम्य ततः परम्।
उपातिष्ठच्च तिस्तायाः सङ्गिभिः सह रोधसि॥ १३४
तत्र कृच्छ्रं महत् प्राप्त मिङनेन मनस्विना।
गता विहाय तं आख्याः सर्व्वे तत्सहचारिणः॥ १३५।
स कष्टात्तरित स्तस्याः पार माप त्रिभि र्दिनैः।
पारावारगतायात-स्रुपायो नास्ति तत्र हि॥ १३६।
अथ कालिम्पनाख्याने स च ग्राम उपागतः।
तत्र कर्म्मवशेनासौ दिन मेक मयाप्यत्॥ १३७।
विपक्षी र्विविधाकारा स्तेषेऽतीत्यागवर्त्मना।
पथीङनोऽपि भूतो दार्लिंकोटोपगम्यत॥ १३८।
अंपेनपदसंरूढ़ आसीत्तत्रोत यो जनः।
रौद्रप्रकृति रापान-परिस्खलत्मानपेशलः॥ १३९।
सगणस्येङनस्यासा-वातिथेयों न सत्कृतिम्।
वरं चक्रे विवादस्य चक्रं तेन सहाधमः॥ १४०।
वसता देवराजस्य दार्लिंकोटे लिखिस्तदा।
दूडनेनेति सम्प्राप्ता निश्चितार्थविवर्ज्जिता॥ १४१।
विदित्वा खलु अंपेनो भवदागमकारणम्।
राजसन्दर्शनोपायं स्वयमेव करिष्यति॥ १४२।

देवराजमनोभावं पन्नगश्चावगम्य सः।
दूडनोऽप्रगुणं नाम तं क्रोधादित्यभाषत ॥ १४३ ।
भूटानेशो ग्रहीतुं मां नो चेत् कामयते कथम्।
स्वीकरोति नवा कर्त्तुं विप्रलम्भस्य भञ्जनम् ॥ १४४ ।
चलतो भारतेशस्य सार्कं शीघ्रं मरुं तदा।
अनिच्छाविषयं तस्य वेदयिष्यामि तामतः ॥ १४५ ।
ननूपायान्तरेणास्य तरसा दूतकर्म्मणः।
दुष्प्रितं फलमालभ्यं यथाशक्य मतःपरम् ॥ १४६ ।
वक्तव्यमिदमत्रास्ते यदस्मिन् साम्प्रं भाविनि।
ततान्तरिक्षविहगो जंपेनस्य न विद्यते ॥ १४७ ।
नापकारं सदा तस्य वरं लाभः पदे पदे।
कृतकृत्यो भवेद् दूतः प्रालब्धवशतो यदि ॥ १४८ ।
स्वाम्नयानुशिष्यत्वैव किन्तु भूटानभूपतिः।
सहायतां वात्र वाधां कर्त्तुं कापन कस्यन ॥ १४९ ।
व्यापारस्यातएवास्य प्रयोगार्थं विधाय सः।
कृपस्य पात्र मप्रीते र्भवेद् भीति रिति स्वयम् ॥ १५० ।
दीदिवि र्लभ्यते नापि जंपेनानुग्रहादिना।
प्राप्यन्ते भारिका नोवा भृतकाः परिचारकाः ॥ १५१ ।
यदृते पदमप्येकं यक्षः संसर्त्तुं मग्रतः।
न कश्चिदिति सञ्चिन्त्य विहस्य दूडनोऽभवत् ॥ १५२ ।
स च पश्चात् परित्यज्य स्वीयसंसर्गसारिणः।
अनेकाननुपायेन प्रतस्थे स्थितिमान् कथम् ॥ १५३ ।
वियद्वाणमितैः सैन्यैः स्वल्पैश्च खनकैः सह।
धूनीश्च धन्वनोऽतीत्य सिप्चुग्राम उपागमत् ॥ १५४ ।

भटजानि विना तत्र गोधनानि कियन्ति च।
दूडनोऽहृतजीव्यानां नान्यत् किञ्चिद्दधं सः॥ १५५।
जनाकीर्णं स्वयं ग्रामं जंपेनोऽभिदधे च तम्।
दूति सानुचरं क्रूरो निर्जनोऽपि प्रवञ्चकः॥ ५६।
शास्ता संवसथस्यास्य ततोऽवादीडनेन तत्।
बोढुं शिविरवस्तूनि भारिकाकृतिहेतुना॥ १५७।
निदेशा निजनाथस्य तेन नासादितो यतः।
स्वीकृतिः प्रकृता कर्तुं तद्दिष्टं सपदीति न॥ १५८।
दूयते यावदादेयः सदसो भटभूभुजः।
वक्तुं तावदुपादिष्ट स्तेनैव मिडनोऽत्र च॥ १५९।
एतावन्ति दिनानीत्थं यापयत्यवहेलया।
विधास्यत्यथ भटेशो विधानं ग्रहणाय मे॥ १६०।
स्वास्थान्यामिह सन्देह दूडनेनेति तर्कितम्।
दुर्बोध्यं शठकाप्यं किं मयोद्यनसापि हि॥ १६१।
गत्वाग्रहासमिमं मुग्ध मुषित्वा निष्प्रयोजनम्।
कालक्षेपो न कर्त्तव्या नितरामत्र तत् पुनः॥ १६२।
प्रतियास्यति किं सद्य दूत्यसौ विविदे तदा।
राज्ये स्वीयप्रभो र्नित्य-मतप्रकृतिकन्धरे॥ १६३।
पुरएताथवा कञ्चि-दथ पश्चाद्विधाय तान्।
तमल्पाः स्वानुगच्छन्ति सैन्याद्या ये च सङ्गिनः॥ १६४।
कर्म्म किञ्चिदसम्पूर्णं न यद्भूपितु मिच्छति।
सोऽग्रहीदनयो र्धीरो द्वयोः श्रेष सुपायवोः॥ १६५।
अयमौपयिकः पन्था न वा न्यायानुमोदितः।
दूति चापि समालाप्य मन्यत्रैव स्थले किल॥ १६६।

फेब्रुयरीसमाख्यस्य मासस्य वासरेऽथ सः।
द्वितीये खगणं क्षित्वा सैनिकैः संयुगत्तगैः॥ १६७।
समं पञ्चावसङ्घातैर्विंशायुधरसंख्यकैः।
ग्रामं सायगनाख्यान मभीयाय ससाहसः॥ १६८।
अवस्थायावपातोऽभू-दुपरि ग्व खनारतम्।
पन्थानं तुबलासंज्ञं कृच्छ्रेणातियथावसौ॥ १६९।
अमी सशस्त्राः सर्व्वे तस्यैकस्य प्रपेदिरे।
प्रालेयेन परिव्याप्तं निशावासार्थ माश्रमम्॥ १७०।
संजज्ञिरे निरुत्साहा युगपत् कारणादतः।
सापरागाः स्वकार्य्येषु नेतुराज्ञातिगाश्च ते॥ १७१।
एवमत्र विपत्तीः स भेजेऽभीक्ष्णमनेकधा।
न अहो निजसङ्कल्पं तथापि क्षतनिश्चयः॥ १७२।
सुधीः कथमयत्र निराशो नेऽनोऽभवत्।
दृश्यते तादृग स्तेन स्थिरकर्म्मा विना न कः॥ १७३।
विश्रामार्थमवस्थाय दिनमेकं स तत्र च।
सायबीसंज्ञकं दुर्गं लक्षीकृत्य ययौ ततः॥ १७४।
आनुकूल्यन्तु दूतस्य कर्त्तुं वा परिपन्थिताम्।
दुर्गाध्यक्षेण सम्प्राप्तं स्वप्रभो र्नामुद्रासनम्॥ १७५।
भटेशो भारतेशस्य र्व्वाः प्रत्युद्यातं नहीच्छति।
सन्देशहरमित्युक्ता दुर्गस्याधिकृत स्तदा॥ १७६।
नावग्रीहोष मास्थातुं स्वीये शिरसि स स्वयम्।
निसर्गो हीदृशो नृणां सर्व्वतो हीनचेतसाम्॥ १७७।
अन्तराय मतिक्रम्य नित्य मग्रो नवंनवम्।
सायब्यां सप्तुपागच्छदिडनोऽपि प्रसन्नधीः॥ १७८।

सिप्रुसंवसथे स्थित्वा यानायातोऽत्र सङ्गिनः ।
पुनस्तान् दार्ज्जिलिङ्गेऽथ प्रतियातुं समादिशत् ॥ १७८ ।
उपायस्तु कृतः यच्छत् सन्देशासक्तयेऽमुना ।
दार्ज्जिलिङ्गे तथा सिप्रौ संरक्ष्य स्वजनान् कति ॥ १८० ।
प्रेक्षिटाधस्तनामात्यान् भूटानभूपसंसदः ।
उह्यमानश्च सोऽत्रैव पत्रयुग्मं नृपस्य तैः ॥ १८१ ।
लिखितं प्रति जंपेनं भूपालेनैव यत् स्वयम् ।
खेताङ्गादिडनाद् भीतैः स्वैरेतत्तु प्रदर्शितम् ॥ १८२ ।
तयो रन्यतरत् पत्रं विरागलक्ष्मलक्षितम् ।
भूटेशस्य चिराभ्यस्त-चित्तचाञ्चल्यचञ्चणम् ॥ १८३ ।
प्रतिनोक्तुञ्च तं दूतमपरत्रेति धीक्षितम् ।
साम्राज्ये विटनेशस्य कार्य्या चेष्टा यथोचितम् ॥ १८४ ।
स्वीकृतिं विदधीतासौ नो चेद्दूतोऽत्र दुर्भगः ।
वर्त्मनान्येन सम्प्रेष्यो जंपेनेन स कौशलैः ॥ १८५ ।
ते राजपुरुषाः सर्व्वे कार्य्यतो न प्रचक्रिरे ।
अथ प्रत्यर्थितां काश्चित् प्रत्यूह मिडनं प्रति ॥ १८६ ।
फेब्रुयारीसमाख्यस्य मासस्य दशमेऽहनि ।
बोखारे सायवीं त्यक्त्वा स च मध्यन्दिने गतः ॥ १८७ ।
स्खलतीवदुरारोहं तथा दुरवरोहणम् ।
तैरुल्लापथमत्यर्थ-कष्टेनातिययावसौ ॥ १८८ ।
अग्रेस्थित्वा कियद्दूरे पतित्वा साश्विसंघके ।
कस्यचिद् वसतौ तर्हि जंपेनस्यागमत् पथि ॥ १८९ ।
तत्रत्यः खलु जंपेनः सुजनः सरलः सुधीः ।
दूडनोऽभ्यर्हितो येन आतिथेयोपचारतः ॥ १९० ।

पाथेयमोदनं तस्मै विनत्यासौ व्यधित्सयत् ।
कियत्तेनानुदन्तोऽस्य एवं तत्रेङ्गनः स्थितः ॥ १९१ ।
स तदैवेति शुश्राव वसन् जंपेनवेश्मनि ।
आयाता गतिरोधाय कति तस्य प्रतिद्विषः ॥ १९२ ।
स्वीयै रभिसरैः सार्द्धं निरुत्साहो निराश्रयः ।
दूडनो जेमनं नाम्ना क्षुधोदन्याप्रपीडितः ॥ १९३ ।
क्षुद्रेऽथ गत एकस्मिन् ग्रामे भ्रान्त्यन् समन्ततः ।
तत्र प्रणिधय स्तस्य दहशुर्भटभूपतेः ॥ १९४ ।
तर्कयित्वा च श्रयिष्ठं पत्रमेकं प्रदर्शितम् ।
अभितो भटराजस्य चरैस्तैरिङ्गनन्तदा ॥ १९५ ।
भाव एषोऽस्य पत्रस्य ततो द्राक् प्रतियाय यत् ।
दूतो त्रिटनराज्यस्य भटपर्व्वन्तदेशतः ॥ १९६ ।
सीमानिर्द्धारणोपायं भटभारतराज्ययोः ।
कुर्व्वीत नतु चेत्तत्र कृतकृत्योऽधिकारतः ॥ १९७ ।
आयेत देवराजस्य दर्शनायैव तदा खलु ।
असौ गत्वा पुनाषाया मनुज्ञां पुनरायाति ॥ १९८ । §
प्रत्यवादीडनेनेति श्रुत्वासारन्तु तद्वचः ।
प्रवर्त्तितव्यं तेनात्र सन्धिप्रकरणेऽनकैः ॥ १९९ ।
नामात्यै र्भटनाथस्य संश्लिष्याधस्तनैः सह ।
निदेशं त्रिटनेश्वर्य्या आसाद्य सपदि स्वयम् ॥ २०० ।
देवराजं पुनाषायामथ द्रक्ष्यति डीडनः ।
स वा भारतशास्तारं निकषा कार्ययिष्यति ॥ २०१ ।
प्रतीत्य दाक्षिलिङ्गस्य चरितं धरणीभुजः ।
कलुषं वष्टि नेत्येव ग्रहीतुं तमसौ कथम् ॥ २०२ । ¶

निशम्य वाक्य मोजोव-दिडनस्य सगौरवम्।
प्राङ्गन्तुं पुनाखायां सायङ्कं तं प्रतिक्षसाः॥ २०३।
समानं सङ्गिरन्तेश्च प्रत्युद्गन्तुमसुत्र तम्।
अथ संवसथे सोऽपि गतः पारोसमाह्वये॥ २०४।
शासिता यस्य तत्रत्यः क्रूरः कैतवकेकरः।
वञ्चितं केवलं व्यर्थं सद्भावं समदर्शयत्॥ १०५।
वासराणीडनः कष्टा-दुषित्वा तत्र षोड़श।
राज्ञो वाचिक मप्राप्य प्रतस्थे त्वरया ततः॥ २०६।
मार्ग्गसंज्ञस्य मासस्य सोऽथ शुतार्कमे दिने।
राजधान्यामुपागच्छद् भूटराज्यस्य डीडनः॥ २०७।
ततः किमभवत्तत्र कथमभ्यर्थितोऽथवा।
दूडनश्च तदा राज्ञा मनस्वी पिशुनात्मना॥ १०८।
कथमासेव्य दुःखानि भूरिशोऽनुभवैः सह।
प्रत्यावर्त्तत निर्बाधं यत्नसीमा मतीत्य सः॥ २०९।
सोऽथ केन प्रकारेण हृया लोकै स्तिरस्कृतः।
कृत माविष्कृतेनैषां विषयाणां धृतिच्छिदाम्॥ २१०। §
भीषणं कौणपस्येव न दृष्टं विपदो मुखम्।
गृहीतो न कदापीह कार्य्यभारो हि यै र्गुरुः॥ २११।
उपहासो विलासश्च कर्म्म येषां महात्मनाम्।
उपाधानाहितात्मानः शेरते ये गृहेऽलसाः॥ २१२।
दृष्ट्वा कृत्येऽकृतार्थत्वं गुरुष्वन्यस्य दुष्करे।
आविष्कर्त्तुं मनायासं त एवार्हन्ति गर्हणाम्॥ २१३। *
दूडनो विदधे किन्तु निजकार्य्यविसाधने।
यथायथ्ञि श्रमं यत्न मस्ति नः संशयोऽत्र न॥ २१४।

विपत्तौ धृतिमान् विद्वान् सदैवाध्यवसायवान्।
समयराजनीतिज्ञो यश्चानूनगुणान्वितः॥ २१५।
सुयोग्यः स तथापीह केन वा विफलोऽभवत्।
चक्रिणो हि विधेश्चक्रं कोऽत्र खण्डयितुं क्षमः॥ २१६।
कार्य्यमस्य समालोच्य दूतस्य तु तदातनम्।
निरणायीद मस्माभि रफलत्वे हि कारणम्॥ २१७।
यद्यदेव कृतं तेन गत्वा भटानराज्यतः।
निगूढ मभिसन्धानं तत्रासीद्विमलात्मना॥ २१८।
व्याजतो भटराजस्य गर्हितं यदनुष्ठितम्।
कृत्यमन्यै रसदृक्षै स्वतत्यै राजपूरुषैः॥ २१९।
प्रधानामात्यवृन्दानां राज्ञ स्वज् ज्ञानतोऽभवत्।
न वाथो कर्त्तुमिच्छन्ति तेऽपि तस्य प्रतिक्रियाम्॥ २२०।
अवैतुमिति तत्त्वेन समैच्छद्विडन स्वदा।
प्रतीयाय च तत्रासौ विना राज्ञोऽनुमोदनात्॥ २२१।
प्रवूयुरिति चेदेते तत्प्रत्यागमनात्परम्।
दूतं विटनराज्यस्य ग्रहीतुमभिलाषुकाः॥ २२२।
किन्त्वकाण्डे प्रयाणेन स्वतएव तथाभवत्।
विलम्बतेश्च तत्तत्र दूतनो निष्प्रयोजनम्॥ २२३।
दूतकार्य्य मिदं तावत् समजायत निष्फलम्।
सहेत कोऽपि नाख्यातु मिति न्यायानुसारतः॥ २२४।
सर्व्वं रिति च सङ्कीर्णं फलं यदत्र किञ्चन।
सञ्जात मिडनेनापि प्रोक्तमेतत् स्वयन्तदा॥ २२५।
मित्रभावेन भटान-राज्येऽन्यै दूतनोदनम्।
मन्यते भारतेश्वर्य्या महतीव विडम्बना॥ २२६।

आचारव्यवहारादि ज्ञातं भटौकसाञ्च यत् ।
अवस्थाय मया तत्र प्रतीति रिति मे ततः ॥ २२७ ।
उपाया नाम यावन्तो भाव्यभव्यविभञ्जनात् ।
विद्यन्तेऽत्र वरेण्योऽयं तेषां श्वःश्रेयसायतिः ॥ २२८ ।
कृतं भारतसाम्राज्ये विविधं भटवासिभिः ।
अनिष्टं मसकृत् सोढं मयाभिः परिभूय तत् ॥ २२९ ।
प्रताप भवजङ्घुस्ते राज्ञा भुवनविश्रुतम् ।
क्षणीभूतस्य शूरस्य यथैवं फेरवो वरेः ॥ २३० ।
इदानीमिति पश्यामि वस्तुतः सत्प्रदेशतः ।
राज्ञा सुविहिता काचि-व्याप्ति र्यावनपद्धतिः ॥ २३१ ।
आवेशिका नाद्रियन्ते मूढैः क्रूरैश्च माहया ।
प्रतिवेश्यपरीतेऽपि स्वराष्ट्रे भटवासिभिः ॥ २३२ ।
अमात्यै र्भटराजस्य समुच्चपदसंस्थितैः ।
निकारो नः कृतः पूर्वं मिथः कैतवसम्पदा ॥ २३३ ।
नावनम्येति तत्त्वेन संशयासक्तसम्विदः ।
तदैतस्य वयं सद्यः प्रतीकारं न चक्रिम ॥ २३४ ।
व्यापारेऽत्र हृता यास्ते भारतीयप्रजा बलात् ।
तेषां वेश्मसु दुर्गेषु प्रेष्यवत् सन्ति ताः सदा ॥ २३५ ।
श्रुत्वा भारतराज्यस्य वरेनृसाख्य मुदातनः ।
अवोचदिदमत्रोत मानीनः कृतलक्षणः ॥ २३६ ।
विदितं प्रथमादेव ग्रहीतु मिडनं न यत् ।
भटाधिपति रन्वैच्छ-दस्माभि रिति दुर्मतिः ॥ २३७ ।
समीक्ष्यन्तेऽन्तरायं तद्वरस्याधिनोऽनिशम् ।
हूडनस्यायने कर्तुं वैधेयाः पशवो यथा ॥ २३८ ।

राजप्रतिनिधेरेतत् श्रावते यै मतं जनैः।
समाकर्ण्येति ते नूनं गमिष्यन्ति न विस्मयम्॥ २३८।
श्रासनं त्रिटनेशस्य प्रयाय परितुं तदा।
स्वदेयस्य स्थितिं पातुं स्वजातस्य च गौरवम्॥ २४०।
प्राप शारीरिकं दुःखं मनस्तापमानसिक न्तथा।
पुरस्कारोऽभवत्तस्य तिरस्कार स्ततःपरम्॥ २४१। ●
यदुक्त मिङ्गनेनात्र स्वयमुत्तरसाधिना।
औत्सुक्येन तदस्माभि रिह विस्मं प्रकथ्यते॥ २४२।
अष्टादशशतातीत-सिन्धुलोकप्रमे हि ये।
खष्टीये श्रावने प्राप्तं नोदिता दूतकर्म्मणि॥ २४३।
अटेशसचिवै स्तेऽपि गृहीता ननु रीढ़या।
अग्मू राजसदः किन्तु विना विघ्नं ससाहसम्॥ २४४।
प्रत्यावाताच्च संक्रामात् मरुतोऽत स्तथैवते।
स्वीयसङ्कल्पसंसिद्धौ जग्मिरे न कृतक्रियाः॥ २४५। §
स्थित्वा तत्र तदस्माभि रेतदेव वितर्कितम्।
परमित्वं मत्प्रयाणाद्ध अटेशोऽवसरोचितम्॥ २४६।
ग्रहीतुं भारतेशस्य दूतं सगण मादरात्।
पुनाख्यायां ससुद्योग मकरोदिति वक्ष्यति॥ २४७। ●
एतैश्च कारणै रन्यैः प्रत्यावातो न भूरिभिः।
अटराज्यादहं सद्यो विच्छ्यावति मेव हि॥ १४८।
प्रकृतः परिभावस्तु मयि यद्ध अटवासिभिः।
अनार्य्यावस्थया कथ्यः सहि तेषां स्वभावजः॥ २४९।
तत्र ये च मया दृष्टाः पदस्था राजपूरुषाः।
सर्व्व एतद्विशेषेण ससृजु र्वंच एव ते॥ २५०।

ग्रहीतश्चो भवान्नूनं सादरं राजसंसदि ।
कार्य्यो तेऽर्चितो राज्ञा चातिथेयो यथाविधि ॥ २५१ ।
मदुपागमसङ्कल्पे ग्रथङ्ढ भटानवासिन: ।
जाता ह्यपरितोषान: समासादितसाध्वसा: ॥ २५२ ।
नि:सहायन्तु मां प्रेक्ष्य तेषां नापगत: खलु ।
संशयो वङ्कलीभूतो वरं चित्तो रसोऽप्ययम् ॥ २५३ ।
केवलं वत कर्म्माणि दूषयित्वेडनस्य न ।
हिंसन्तिस्म जना ये तं न्यवर्त्तिषत सूचका: ॥ २५४ ।
अविचार्य्यकारिताया: फलमेतद्विचेतस: ।
क्रूरै रित्येव मुक्त न्तै रिडनस्यात्र कर्म्मणि ॥ २५५ ।
अनुभूति रियं तेषां पुनाचार्य्यां जगाम स: ।
विनैव कर्त्तृपक्षस्य निर्देशेन यदृच्छया ॥ २५६ ।
अर्य्यागिति च विख्यातं नानुग्रिष्ट: स कर्हिचित् ।
स्वेच्छया वङ्कयाख्या न चकार कर्म्म किञ्चन ॥ २५७ ।
सप्तीयेऽष्टादशशत-युक्ते वेदरसप्रमे ।
शायने च दिने विंशे मासि सेप्टेम्बराभिधे ॥ २५८ ।
सेसीलडिनाख्येन वङ्कयाख्या महात्मना ।
तदात्तनेनेद मुक्त मत्र विश्रुतकीर्त्तिना ॥ २५९ ।
येनूलोपदगत: कश्चित्पारोग्यामेऽनुकूलताम् ।
प्रकर्त्तीति च तत्पूर्व्व मिडनं समवेदयत् ॥ २६० ।
अनिच्छुरपि भटेयो ग्रहीतु मिडन न्तदा ।
नादेष्टुं प्रतियानन्तु सेहे तस्य ससाहसम् ॥ २६१ ।
पारोभवसथे प्राप्त: स्थाने यद्विडनोऽगमत् ।
प्रतिभाप्रतिबोधेन स तदाङ्कितलक्षण: ॥ २६२ ।

अन्यत्र विषये तस्य कार्य्यं चेदनुमोदितम् ।
सचिवैर्भारतेश्वर्या राजनीतिविशारदैः ॥ २६३ ।
अवेत् सम्यधारणायां तेषां सएव भाजनम् ।
न कथं बुद्धिमानत्र वरिवस्थितकर्म्मणाम् ॥ २६४ । ●
दुष्टस्यापि प्रमाणानि बहूनि सन्ति कर्म्मणि ।
तदप्यारोपयामास दोषानस्यैव मूर्द्धनि ॥ २६५ ।
ज्ञात्वा सत्यं यथासाध्य मनिष्टं स वताग्रजः ।
प्रभोः प्राप प्रसादं न यद्वो वा संस्तौ कथम् ॥ २६६ ।
खक्रियालिङ्गनच्छद्मे यथा धृत्वा च यत्नतः ।
मर्षितापि क्षेत्ररात्रीम् नान्यः कर्त्तुं क्षमस्तथा ॥ २६७ ।
सचिवा ऊचे वदन्ति स्म पुनाचार्यां ववावसौ ।
पुरस्थाप्तानने वेश्म किमपीति यदृच्छया ॥ २६८ ।
अनौपयिकतैतस्य वचसस्तु प्रहर्षिता ।
ओजोवद्भिः प्रमाणैर्वा कर्त्तापत्नीव्यतःपरम् ॥ २६९ ।
दूतस्य सूचितिः साधु नूनमन्यापदेशतः ।
प्राङ्ग रक्ष द्विषो दोषा-नावरीतुं निजानिति ॥ २७० ।
निरचैषीदिति प्राज्ञं वेत्तीवविदुषः स्वयम् ।
नेदृशेन वदास्मिन् व्यापारेऽत्र विगर्हते ॥ २७१ ।
अरत्नुप्रमितायान्तु कटीवद्यरदीव सः ।
अष्टादशयतेतायां राजप्रतिनिधिं प्रति ॥ २७२ ।
दूतस्य समाख्योच्च दूतत्वाद्यदर्थकः ।
वर्णना वर्त्तते श्लोका तत्र वामलिखद्विपिम् ॥ २७३ । ●
तदा भारतभाक्षा च सरेनृसाक्षेन धीमता ।
सुनिर्भिन्नमथाकर्ण्य दूतमत्रोदितं वचः ॥ २७४ ।

पारोग्रामे यथा गत्वा वतासौ दुर्गतिं गतः ।
अभविष्यत्तत स्तस्य प्रत्यायानं हि साम्प्रतम् ॥ २७५
अवस्थायाथवा तत्र निर्णेतुं स्वविधेयताम् ।
आत्माभिग्रंसनं न्याय्यं कल्पयत्यसकायतः ॥ २७६ ।
अर्व्वागवसितं तेन विदुषेति वरीयसा ।
अपराद्धो हृथा पूर्व्वं मिडनः कृतलक्षणः ॥ २७७ ।
केवलं वङ्गराजारं न पुरःस्फूर्तिवाचिकम् ।
सर्व्वा एवापदः स्वस्य सदासौ समवेदयत् ॥ २७८ ।
प्रणिधुक्तः स तेनैव सततं वचनेस्थितः ।
स्वकार्य्यं मिडनो भूटे चक्रे केशरिविक्रमः ॥ २७९ ।

दूत्यं समाप्य निजकर्म्म तदा गताधिः,
प्रग्रेप्र पदे पुनरसौ ननु वङ्गराज्ये ।
तस्मादकस्य नव तत्र समाः समासीत्,
जग्ने यतोऽस्य जरती युवती समग्ना ॥ २८० ।

गतवानथ हृष्टमानसो,
भवभूमिं विरतेः स कासुकः ।
नियतश्रमजातविक्रमः,
कृतिसूरः प्रकृतः समिद्धधीः ॥ २८१ ।

इति श्रीमद्धिडनचरिते भूटानेश-साम्यप्रकरणं नाम चतुर्थः सर्गः ।



पञ्चमः सर्गः ।

अष्टादशशतातीत-सोमाब्दिप्रमितेऽथ सः ।
कष्टीये कायने भूत्वा प्रवेकदेशपालकः ॥ १ ।
इडनो ब्रह्मदेशे य-द्विराजाधिष्ठितेऽकरोत् ।
तदालोक्य मिथस्ताभिः शुशंसुः सुसमं शिवम् ॥ २ । ●
आभाया भूभुजा साकं पार्थिग्राहैश्च राजभिः ।
इडनेनैव नो राज्ञाः सुसम्बन्धः समाहितः ॥ ३ ।
वर्त्म वाणिज्यकार्यार्थं माकलय्य च राज्यतः ।
चीनापणिकवृन्दानां श्रेय चक्रे स शाश्वतम् ॥ ४ ।
नाद्यार्ष्यसुषमा तस्य राजनैतिककर्म्मणि ।
बभिरासीद् वरेण्यस्य वंशिष्ठयशसः कदा ॥ ५ ।
गत्वा प्रथमतः स्वत्र ददर्शतौडन स्वदा ।
ह्यातं राज्ञः प्रसादेन दृषां वाणिज्य माणकीम् ॥ ६ ।
भावोऽभिनव एवैको युगपत् स्वान्तमाश्रितः ।
ब्रह्मेयस्य वसारात्ते हिंवीवाश्वरसां गणः । ७ ।
प्रतीच्यस्वैरवाणिज्य-संश्लेषेण समुद्यतिम् ।
सदासम्यत्सवित्रौं हि स्वराज्यस्य चिकीर्षणा ॥ ८ ।
यशो जगति येनात्र यातव्यमिति यत्नतः ।
होहदो हयितो नाम यथा मतो दुरोदरः ॥ ९ । ●
अपाकर्त्तुमभावन्तत् स्वदेशस्य नृपेण तु ।
वैदेशा दूयुरोपीयाः सत्यङ्कारेण सन्दिताः ॥ १० ।

Digitized by Google

प्रदेष्यानि पण्यानि वस्त्रादीनि च भूयसः।
गृहीत्वौपयिकं वस्त्रं तैरन्यस्य न कस्यचित् ॥ ११ ।
केयाणि तानि वस्तूनि सदा राजसकाशतः।
वणिग्भि श्चीनदेशीयै रपरे चेत्युपश्रुतम् ॥ १२ ।
पण्यं प्रथमतः स्वत्व विक्रीतं वस्त्रवस्तु तैः।
वस्त्रादि विविधं शीघ्रं सार्थवाहैः समन्ह्यत ॥ १३ ।
जनप्रयोजनातीतं द्रव्यजातं मनीषया।
आतः क्रीतमवाग्रोऽतः निषस्रावक्रयः क्रमात् ॥ १४ ।
ब्रह्मराजो यथा पण्यं चेक्रयीति च सत्वरम्।
यथाक्रं न स विक्रेतुं स्वराज्ये त्वरया तथा ॥ १५ ।
स्वकीयकर्म्मचारिभ्यः प्रददौ भर्म्मणा विना।
अमूल्येव स वस्तूनि दूत्यदूरसमीक्षकः ॥ १६ ।
विक्रीतानि च तै स्तानि गृहीत्वा मूल्य मल्पकम्।
आपणे वणिजा न्यस्त सङ्कटं ससुपस्थितम् ॥ १७ ।
अष्टाद्यशतातीते शकाब्दे सिन्धुलोकमे।
ब्रह्मेयो विधि सुल्लङ्घ्य साम्नः संसाधितस्य हि ॥ १८ ।
वाणिज्यं धनलोभेन चकारैकेश्वराश्रयम्।
क्रत दूत्यभियोगस्तै रिङनस्य समीपतः ॥ १९ ।
तदा सोऽपि तदाकर्ण्य विशेषेण विचिन्त्य च।
भविष्यत् फलमालोच्य चक्रे सपदि नोत्तरम् ॥ २० ।
निधिद्वा त्रिटनेशस्यार्था वाणिज्याव्यापरे यथा।
सर्व्वथा ब्रह्मराजस्य श्रेय स्तदनुसाधनम् ॥ २१ ।
ब्रह्मेयस्याधिकारोऽस्ति याद्दग्यः क्रयविक्रये।
अन्येषामिह सर्व्वत्र जनानामपि तादृग्यः ॥ २२ ।

धनाढ्या जगतश्चैव यदा प्रभव माप्नुयात्।
नृणां वाणिज्यचिन्तेव तदा तामनुधास्यति ॥ २३ ।
स्वतएवोदितं राज्ञः शास्त्रचक्षुरतःपरम्।
तृष्णा वाणिज्यतश्चास्य जाता क्रूरतरा मनैः ॥ २४ ।
सुखमःप्राप्तुकामेन तेनेत्थं मय चीक्षितम्।
यदेतद्विहितं सर्व्वं तत्त्वत स्वदभूलकम् ॥ २५ ।
पूडनोऽवसरं प्राप्य पात्रकाणविवेकवान्।
उपादिदेश राजानं वाणिज्यात् प्रणिधर्त्तुम् ॥ २६ ।
तदा तद्धितवादेन सद्यः सुफलमुन्नतम्।
घनसाधारणे काले यथा बीजाङ्कुरोद्भवः ॥ २७ ।
क्रयविक्रयकार्य्यञ्च तद्राज्ये पूर्व्ववत् पुनः।
अन्तराव घते नेवे यथासौ निर्झरो गिरेः ॥ २८ ।
पूडनो यदभ्यतिष्ठद् व्यापारे कथिलेऽत्र तु।
क्षमो नैकमुखेनाहं कर्त्तुं तत्कर्म्मणो स्तुतिम् ॥ २९ ।
न मुक्तो भारतेश्वर्य्याः संस्पर्शोऽत्र कथञ्चन।
तदा नेनेति निर्विण्णं विद्वेषेणाहदर्शिना ॥ ३० ।
प्रेक्ष्या जन्मभुवो नासा-वष्ठीवन्व्यायवत्तस्थि।
समैच्छत् स्वयमाधातुं सदाकर्त्तव्यबोधवान् ॥ ३१ ।
यद्वारभ्यं विना तेन यद्वै सदुपदेशतः।
केवलं प्रकृतं कार्य्यं राजनीतिविदा तदा ॥ ३२ ।
यशो लब्धं नवा लब्धं काचि त्तेन नच क्षतिः।
प्राप्तं कर्म्मफलं किन्तु यदर्थमिति चेष्टितम् ॥ ३३ ।
वज्रं नाशयितुं यद्वि भेषजं न भवेदलम्।
विपरीतो गुणो वा स्या-त्तदा दिव्येन तेन किम् ॥ ३४ ।

Digitized by Google

हतं धृतिमता सत्यं तेनानायासमाशु यत् ।
अन्ये तदङ्गयत्नेन चञ्चलाः कर्तुमक्षमाः ॥ ३५ ।
अष्टादशशतातीते खष्टाब्दे पञ्चसिन्धुमे ।
ब्रह्मराज्यादथैलण्डे राज्ञा दूतः प्रचोदितः ॥ ३६ ।
दोषमारोपयामास्तु रतएवापदेशतः ।
उन्मुक्ते दूडनस्यांशे राज्यभारवहे द्विषः ॥ ३७ ।
ब्रह्मराजो वतात्यत्य-राजपूरुषपीडितः ।
शरण्यं ब्रिटनेशञ्चार्या गतः प्रोक्तश्च तैरिति ॥ ३८ ।
शृणेष यथमिलण्डे दूतोऽसौ प्रेषित खहा ।
तन्तु हेतुवशेनात्र विस्तरेणाभिधीयते ॥ ३९ ।
दूडनस्यावगीतिर्यां विहिता तैस्तु साहता ।
खलतावद्विचेतोभिः खलतेव चलात्मभिः ॥ ४० ।
दूंराजाधिष्ठितं मान्यां ब्रह्मराज्यं विभेदतः ।
विभक्तं हि यथा लेधा तत्क्रमश्चेह कथ्यते ॥ ४१ ।
आराकानश्च पेगुश्च तीनासारीम एवच ।
पेगुः समग्रराज्यस्य तृतीयांशस्तु मानतः ॥ ४२ ।
अष्टादशशतातीते खष्टाब्दे पञ्चभूतमे ।
शेषोक्त मालसाञ्चकेतं देशं भारतेश्वरी ॥ ४३ ।
ब्रह्मेश खं पुनः प्राप्तुं स तदाप्रभृतीहते ।
करात् पान्थः प्रसह्येव मौनं ध्येनेन संहृतम् ॥ ४४ ।
अष्टादशशतातीते खष्टाब्दे वेदबाणमे ।
पुनश्च प्रेरितो दूतो ब्रह्मराजेन संसदः ॥ ४५ ।
यास्तु भारतवर्षस्य समीपेष्वन्वयाचत ।
विनयेन स तद्राज्यं भिक्षामिव पराजितम् ॥ ४६ । ●

समाकर्ण्य वचः तस्य सगर्वमिदमाह सः।
पत्रं प्रतिवाक्यं य-दतादृग्जनोचितम् ॥ ४७ ।
यावद्भवति मार्त्तण्डः प्रचण्डकरभास्करः।
तावज्जयपताकात्र विटनेत्रा विकाशिता ॥ ४८ ।
राज्यविस्तृतितृष्णा वा स्वयशःप्राप्तिलालसा।
स्ववाहुबलसंलब्ध-राज्यात्यागाभिकामना ॥ ४९ ।
राजप्रतिनिधे तस्य निकामनीतिसंविदः।
दुर्दशाचरणे निन्द्ये नानवद्यस्य कारणम् ॥ ५० ।*
विद्युतेऽत्रापरो हेतुः संक्षेपेणोच्यते च वः।
प्राच्यवङ्गप्रदेशानामपदिश्येतिवाचिकम् ॥ ५१ ।
वङ्गराज्यं यदा पूर्वं जविभिर्यवनैर्जितम्।
उदीच्यखोन्नि तस्यासन् स्वतन्त्राणि वहूनि हि ॥ ५२ ।
तदा क्षुद्राणि राज्यानि रक्षितान्यतियत्नतः।
उल्लिख्यन्ते प्रधानानां मया नामानि तेष्विह ॥ ५३ ।*
त्रिपुरा कामरूपश्च ख्यातः कोचविहारवत्।
आराकानश्च चत्वारो देशा भूपतिभूषिताः ॥ ५४ ।
मणीप्रारण्यमध्यस्थ-दुष्प्रवेशप्रदेशतः।
वसन्तिस्म स्वाधीना आसरा नृप ये नराः ॥ ५५ ।
न तेषामभिधानानि श्रोतुमिच्छन्ति सज्जनाः।
कौतूहलवशेनापि निरुक्तो वर्णनादतः ॥ ५६ ।
पूर्वद्वीपान्तरीपे हि यथा भारतराज्यतः।
विभक्ता वहवः सन्ति विषयाः स्वल्पविस्तृताः ॥ ५७ ।
ऐशान्यां त्रिपुरादाश्च ब्रह्मदेशो मनोरितः।
आग्नेय्यां कामरूपोऽस्याः खोन्नि प्राच्यामवस्थितः ॥ ५८ ।

आराकानपार्श्वगतं पेगुराज्यं सचक्रिमत्।
पुरासीद् ब्रह्मराजस्य साचादुत्थाप्यशक्तिवत् ॥ ५८।
कोचविचारभूपाला मङ्गत् सम्मान मायवुः।
पूर्वं विक्रमविध्वस्त-शत्रुसङ्घा वयस्विनः ॥ ५९।
प्राग् यः प्राग्ज्योतिषाधीशः समाक्रान्तोऽपि रंहसा।
यच्छद् यवनराजेन न स्वातन्त्र्यं समत्यजत् ॥ ६१।
प्रतीकारपरत्वासौ नीदृतः परपालिताः।
समुच्छेदं सदा रोषा त्रिनाव नयविद्वली ॥ ६२।
दूसीर्य्यया तरङ्गिण्या त्रिपुरा मेघनाङ्गया।
ब्रह्मपुत्रनदेनापि परराष्ट्रात् पृथक्कृता ॥ ६३।
अवाच्या मेकदा साखी-दाचट्टग्रामविश्रुता।
अथ श्रीहट्टपर्य्यन्त सुहीच्यां प्रकृतिं गता ॥ ६४।
सतीवैकपतिं भेजे पिशितारिवयोवलम्।
पाता येनापि साक्रान्ता जारवद्यवनैः सदा ॥ ६५।
आराकानं पुराभूषुः कर्णुराः पिशिताशनाः।
आर्य्याणां खिन्नदन्तीयं पासभ्या दस्युजातयः ॥ ६६।
अवाच्यदेया वङ्गस्य विजिताखै र्बलेन हि।
गर्व्वोऽवनमित खेषां केवलं यवनैः क्षियत् ॥ ६७।
तथापि रोषसन्दृप्ते र्बङ्गराज्यस्य वक्षसि।
सुगपक्षै र्बलक्षीवै र्निष्ठूतः समरे नलः ॥ ६८।
नीता यवनराजेन राजधानी ततःपरम्।
मुर्शिदाबादतोऽभ्यत्र एवमापीड़ितेन तैः ॥ ६९।
यवनैराततं वङ्गे यदाधिपत्य मुज्ज्वलम्।
पूर्वचीने तदा पेगु राखीद्राज्यावरः खलु ॥ ७०।

सर्वे सामन्तमुपाला: स्वेच्छया शरणं गता:।
पेगुराज्याधिनाथस्य सख्येगानतकन्धरा:॥ ७१।
तङ्गाराकाननसाया-मोमाभामर्त्तवानजा:।
पुरा येन स्ववीर्य्येण जना: सम्यक्परार्जिता:॥ ७२।
आरत्नाकरतोऽवाच्यां राज्यं यस्य सुविस्तृतम्।
ब्रह्मकोचीनचोनादि-राज्यान्यपरसीमसु॥ ७३।
अद्योस्खिदियुरोपीय-राजनीतेस्तु कौशलात्।
पश्चात्तत्र समानीतो वणिग्भि: पर्टुगालजै:॥ ७४।
सद्भेद उपायश्चै: पुन स्तैरेव संकृतम्।
स्वातन्त्र्यं पेगुराजस्य प्रसह्य धनलोलुपै:॥ ७५।
इयुरोपीयया यत्र लतं मन्त्रणया पदम्।
जातं राष्ट्रमसारन्तद् द्विपाशितदधित्यवत्॥ ७६।
आराकानोऽथ पेगुश्च मुक्तो निम्नत्वपाप्यत:।
नवाभ्युदितमाप्राप्तो ब्रह्मराजमधीश्वरम्॥ ७७।
पार्ष्णिग्राहान् क्रमेणासौ बलेन वशमानयत्।
पूर्व्वं येषां विनीत: सन् पदेष्वनमयच्छिर:॥ ७८।
पर्टुगालोद्भवांस्त्यक्तू-मुत्साद्यं स च राज्यत:।
यया नापसृतोत्साहं प्रतापाहतदिङ्मुख:॥ ७९।
द्विषतोऽसौ पराभूय तङ्गाराकाननवासिन:।
प्रणतायेषसामन्त: सत्यमेव ततोऽधिकम्॥ ८०।
भजन्तेऽद्य च ये भूपा अन्येऽपाहततां तदा।
निर्व्वीर्य्यत्वेन ते पश्चाद् ब्रह्मेशाश्रयमाययु:॥ ८१।
तरसारीनपाकृत्य तदानीं त्रिपुरा तु सा।
पत्या प्रपाता सतत मेकासीन्निरवग्रहा॥ ८२।

Digitized by Google

वङ्गस्य भविकं भावि भारतस्याथवाभवत् ।
केवलं कलिते काले पूर्वं तत्रात्र राज्यतः ॥ ८३ ।
पूरंजयक्षितिरन्यत्र विध्वंसमनयद् भयम् ।
जीर्णं यवनसाम्राज्य मेकताविरहेण हि ॥ ८४ ।
सर्वत्र समभावेन प्रपेदे ननु धारणाम् ।
न तदा किन्तु सुस्थिताभिराजराजयासनम् ॥ ८५ ।
अन्यतो मगधाधीश दुष्टचीने बली पुनः ।
सहसा नष्टलक्ष्मीके यवनदाहवपीड़िते ॥ ८६ ।
वीरार्यसनसंख्यान-समुत्थिक्षुभयारवे ।
साम्राज्यमतनोन्मूलं सुदूरप्रसरं तदा ॥ ८७ ।
निवर्तित्रैक्षराजस्य यत्नै र्द्यूपदवीं गता ।
नोपाभङ्क्त स नैराश्यं व्यापारे क्वापि दुःसहम् ॥ ८८ ।
स गङ्गातीरसंस्थानां सम्पदो वीक्ष्य नीरताम् ।
लिप्सामोक्षवयं यातो योषिता मिव यौवतम् ॥ ८९ ।
वङ्गराज्यगता येन-वाराकानो यतो जितः ।
गाङ्गदेयजयाङ्कां विदधीत कथं न सः ॥ ९० ।
राज्यनाशान्मनाक् पूर्वं यवनाना निवासितः ।
कृहि वङ्गभुवः यङ्गः सञ्जातो राष्ट्रविप्लवः ॥ ९१ ।
समभ्युदयमायाता तदाप्रभृति भारते ।
पूरंजयक्षितिरत्यर्थं रत्नराजिविराजिते ॥ ९२ ।
केवल क्षितिपुराराज खड्गाम्बिरवग्रहः ।
स्वल्पे राष्ट्रविसम्भारे साक्षात् सत्यपि यक्षिमान् ॥ ९३ ।
नीयाजगारिराख्योऽथ विक्रमी प्रतिभान्वितः ।
मणिपूरे तनोतिस्म स्वविद्राजत्वमोजितम् ॥ ९४ ।

स्वाधिकारप्रविस्तार-कारणेन परन्तपः।
ब्रह्मराज्यं विजेतुं य चक्रे दोर्दण्ड मुल्बणम् ॥ ६५ ।
अभीक्ष्णमभिनिर्य्याय विजित्य ब्रह्मवासिनः।
राजधानी कृपस्याथ समाक्रान्तामुना बलात् ॥ ६६ ।
दुर्भाग्यात्तूपरेमेऽसा-वचिरेणात्मकृत्यया।
मणिपूरौकसा माया समग्रानुगता च तम् ॥ ६७ ।
अथ तेऽवसरं प्राप्य योग्यं ब्रह्मनिवासिनः।
मणिपूरावरोधाय प्रतिहिंसापरायणाः ॥ ६८ ।
सदर्पपादविक्षेप-संक्षुब्धधरणीतलम्।
भूषिता रणभूषाभि र्योद्धुकामाः प्रतस्थिरे ॥ ६९ । ●
ते च सञ्चिन्तितां वीक्ष्य विपत्तिं महतीमिमाम्।
सदुपायं मनागत्य कृतमं वीतनायकाः ॥ १०० ।
समर्थां मणिपूरीया दूंराजसत्कारिताम्।
यतन्तेऽद्य चलच्चित्ता भीता ऊर्ज्जस्विनीसुत ॥ १०१ । ●
दूंखण्डीयै र्बधे तत्र ततो ब्रह्मप्रवासिभिः।
हर्षितं श्वेतकाये स्वै र्विद्यालं स्फूर्तिकौशलम् ॥ १०२ ।
अपाक्षा स्वत्प्रदेशीया: परीक्ष्यैषां पराक्रमम्।
सर्व्वे विस्मय मापेदु रङ्गलं बलशालिनाम् ॥ १०३ ।
तदाऽगात् कल्किकातायां भेरेलटसमाश्रयः।
राज्याधिनायको मान्यो नीतिज्ञः सुविचारकः ॥ १०४ ।
परद्रोहात्मरक्षार्थं काम तस्यानुवर्त्तनात्।
विहितं मणिपूरीयै: सार्द्धमिंलण्डजे र्जनैः ॥ १०५ ।
ब्रह्माधिकारः सुकरो यथाऽऽभिः सुपेशलैः।
विजयो ब्रह्मराज्यस्य तथा नेतेति तर्कितम् ॥ १०६ ।

चङ्गयामाह्वयो तस्य निदेशेन प्रनोदिताः।
कति चानुकामीना: सैनिका वीतसाध्वसाः॥ १०७।
स्थानज्ञानविहीनास्ते दुर्भाग्येन च दुर्मताः।
यदैवाज्ञातभूभागे कृपयाता रणस्थले॥ १०८।
तदा विफलमुद्दिश्य मस्य सम्यगजायत।
अभूवंश्च निरुत्साहा दुलण्डीया हतोद्यमाः॥ १०९।
वङ्गसीमान्तदेशानां जयाशा ते व्यहासिषुः।
निर्जितो बालिराजेन यथाङ्गो रङ्गसाम्पतिः॥ ११०॥
एत्य वाणिज्यकार्य्यार्थं भारते सार्थवाहवत्।
वङ्गाधिपत्यमादातुं क्रमश्च ते समुद्यताः॥ १११।
पृष्ठतो मानमाधाय प्राप्तसाध्वससंशयम्।
चिरेण चतुरै वाह स्वकार्य्यं यैः समाहितम्॥ ११२।
गत्वा प्रत्यन्तदेशेषु परोपकृतितो न ते।
स्वीयापकारमन्वैच्छन् संग्रहीतुं रणादिभिः॥ ११३।
साध्वसं सकलं मत्वा तृणाय यहि तेऽग्रतः।
अविधास्यन् सुविज्ञप्ताः कार्य्यं सर्व्वत्र तेजसा॥ ११४।
नाभविष्यत्तदा तेषा मायति र्हि कदाचन।
कटसन्दोहजननी सदाप्रत्यूहसङ्किनी॥ ११५।
मूकीभाव मवालम्ब्य स्थिता ते जड़वत्तदा।
व्यक्ता प्रतिपदं तेषां भीतिः कापुरुषोचिता॥ ११६।
राजनीतिविधानेन पूर्व्वं तै र्येन भारते।
साधितं तद्विपर्य्यासः कृत्यं तर्हि समाभवत्॥ ११७।
हेतौ सत्यपि गरिष्ठे राज्यविस्तृतये तदा।
ऐश्वर्य्यां कङ्कभि प्राप्यां न तैरेव कृतं मनः॥ ११८।

विस्फोढो विप्रकारो यै र्विहितो ब्रह्मवासिभिः।
औदासीन्येन तत् सर्वं हेलयैवमुपेक्षितम् ॥ ११८ ।
ब्रह्माधिपतिरन्यत्र सन्दृप्तः स्वपराक्रमैः।
प्रभुशक्तिं यथा साक्षाद् वीरोचिततमोऽन्वितः ॥ १२० ।
प्रविश्यासामकाचार-मणिपूरादिषु स्वयम्।
परराजकराज्येषु निहितं जयकेतनम् ॥ १२१ । *
अष्टादशशतातीते खष्टीयाब्दे द्विपञ्चमे।
सैनिका बहवो यस्य काचारमभिनिर्ययुः ॥ १२२ ।
प्राणान्तायङ्कया क्षीणै र्जनैः श्रीहट्टवासिभिः।
मेघनाख्यां समुत्तीर्य श्रुत्वेति सरितं तदा ॥ १२३ ।
शान्तमिंराजसाम्राज्यं लक्षीकृत्य समुद्भुतम्।
भयमुच्चैरदेतिस्म बङ्गप्राच्यप्रदेशतः ॥ १२४ । *
बुद्धि र्विकसिता तेषा मिंराजानां समीक्ष्य तत्।
सीमास्थविषयान् पातुं सयत्ना स्तेऽभवन्मुहुः ॥ १२५ ।
प्रतिष्ठाभिनिवेशश्च नैपुण्यमपि दृक्षिषु।
परिसाधनवस्तूनां प्रचुरायोजनं विना ॥ १२६ ।
सिद्धि र्नात्र भवेत् तस्मे दृत्यमीभि र्विचारितम्।
न परं बीजविक्षेपात् क्षेत्रे फलति तण्डुलम् ॥ १२७ । *
अहो वै राजकैः साकं प्राक्च सान्त्वमलापुक्ताः।
पुनरन्वेषिषु स्ते हि कर्तुं तत्तार्हं साग्रहम् ॥ १२८ ।
द्विपञ्चमेऽथ खष्टाब्दे खष्टादशशतार्धके।
पूंराजाना मभूद् युद्धं ब्रह्मराजेन दुर्धिया ॥ १२९ ।
दर्पस्तस्य ततो राज्ञः सर्वस्येवाधितस्थिवैः।
मूतो मन्त्रेण साम्नेव य पूंराजे ततःपरम् ॥ १३० ।

चकिरे ब्रह्मराज्यस्य कियन्तं भागमात्मसात् ।
प्रधनद्रुमसञ्जातं सुरसं ते फलं यथा ॥ १३१ ।
रणेनानेनोपदेश्यः कोऽयो ब्रह्मवासिभिः ।
संलभ्य धृति सर्व्वादा वक्ष्याभिरभिधीयते ॥ १३२ ।
परमेत यतः कालात् प्राप्तं तैरिति तत्त्वतः ॥
सुज्यते ताहृशानां हि नादर्म्येराजयत्नता ॥ १३३ ।
अवेतं भारतीयेन राजकेनेति निश्चितम् ।
अमोघं ननु तद्राज्यं श्वेतकायै यदाततम् ॥ १३४ ।
अभागे ब्रह्मराज्यस्य यत्रैव विजयध्वजम् ।
ब्रिटनीयं वनव्याप्ते निजां भाति भवीभवत् ॥ १३५ ।
नाभवद् गोत्रगणाकीर्णो निर्ज्जनो दुर्गमः स न ।
श्लोकोपहतये कस्यै भारतेभ्याः कदाचन ॥ १३६ ।
एतेन ब्रिटनीयानां विद्विषो ब्रह्मभूमतः ।
दुराशा प्रगता दूरं सर्व्वप्रासकरी ततः ॥ १३७ ।
सर्व्वत्र शासनास्थान मथ सीमाप्रदेशतः ।
परराज्यविघाताय ब्रिटनीयं विनिर्म्मितम् ॥ १३८ ।
अखण्डदन्तर्विरोधेन सुखसङ्घेन जग्मिरे ।
जीर्णा क्षीणबला देया खे च प्रविरतप्रजाः ॥ १३९ ।
अहाऽस्वास्थ्यकरागस्य-वनवीथिविलम्बिताः ।
शत्रुसैन्यैः समाक्रान्ता अभीक्ष्णमपि दस्युभिः ॥ १४० ।
न नराधिपयोग्यास्तु परं वीभत्सरूपिणः ।
कथादा इव ये साक्षा-ज्जनप्राणहरा अपि ॥ १४१ । §
पालन्या ब्रिटनेश्वर्य्याः शक्त्या सात्त्विकयाधुना ।
श्रीमन्तः समजायन्त तएव विषया अयम् ॥ १४२ ।

आराधाने समास्थाय तीनासारीम एवच।
ब्रिटनीयां वैजयन्ती मित्यं जयविघोषिणीम् ॥ १४३ ।
इंलण्डीया जना लोके प्रोद्दामस्वन्त्रदाः।
मन्त्रयन्ते: समुद्धर्षं पेगुस्था: समकालयन् ॥ १४४ ।
यावत्तेषां सच्चदुत्तु पेगु नीयत्तां गतः।
धनार्थि न मन स्तावत् सुस्थिरं समवर्त्तत ॥ १४५ ।
सर्वे सागरतीरस्था: प्रदेशा ब्रह्मभूपतेः।
ऋद्धिदा: पेगुराज्यस्य सदा दिव्यद्रुमा इव ॥ १४६ ।
अष्टादशशतातीते खष्टाब्दे रामवाणमे।
पुनरभ्यागमो भीमो ब्रह्मेयेन सङ्गभवत् ॥ १४७ ।
ब्रिटनेश्वा यशस्विन्या बलदर्पोन्मदेन यः।
तत्र सा तरसा चक्रे पेगुमेव तमात्मसात् ॥ १४८ ।
क्षीराब्धीरिव तद्राज्यं भास्वद्रत्नो दयं यशः।
न रराज विहीनोऽसौ तया तेन च तेन हि ॥ १४९ ।
भेजे मानसिकं दुःखं स महत् सततं ततः।
सैरिभक्षी यथा भीमा हीपिसंङ्गततर्षिका ॥ १५० ।
पुनः स्ववशमानेतुं राज्यं तदसुना कृतः।
ऽकल्पो मन्त्रयत्यात्तु सञ्चेये सुखविच्युतवत् ॥ १५१ ।
सोऽनौत्सीद् ब्रिटनेश्वर्या: समीपेषु प्रतिक्षयान्।
मुक्तस्य समीक्षा च सकला विफलाभवत् ॥ १५२ ।
पेगोकर गते तस्य प्रभुशक्ति र्भविष्यति।
अतःपरमितोत्साहा यथेवाऽऽस्थिनी पुरा ॥ १५३ ।
खण्डाल्होसिसंज्ञेन नीतिज्ञेन यशस्विना।
विश्वं भारतसाम्राज्य-माख्येति सुमनीषिणा ॥ १५४ ।

Digitized by Google

केवलं स समुच्छेत्तु मामुलाद् ब्रह्मभूभुजः।
दुराग्रावततौ मेत-दवोचत् पिशुनं वचः॥ १५५।
इति सत्यपि तेनोक्त क्षुधा तां मनसो कृपः।
नापाकर्तुं शयाकेव प्रमदाप्रेम क्षुत्तम्॥ १५६।
उपाया बहव स्तेन वरमुद्भाविता कृतः।
दुर्भाग्येनात्र सञ्जाता निरर्था स्तेजनेऽङ्गवत्॥ १५७।
न कोऽपि ब्रह्मभूभर्तुं विदधे सत्कारिताम्।
न समेति शुभासङ्गं लक्ष्मीहीनो हि बान्धवम्॥ १५८।
अष्टादशशतातीते खटाब्दे यद् द्विसप्तमे।
देङ्नेऽभ्यर्थनास्थानं राजप्रतिनिधेरभूत्॥ १५९।
तत्र भारतशास्ता स लर्डनर्थब्रुकाभिधः।
प्रत्युवाचेति वचनं यथा कृष्णस्य दंशनम्॥ १६०।●
नित्यशो ब्रिटनेशस्यार्थी नूनं वंशपरम्परा।
आराकानस्य पेगुश्च तीनासारीममेव च॥ १६१।
पालयिष्यति राज्यानि त्रीण्येतानि गरीयसी।
प्रतापधूपितोद्भूत-शत्रुसंघं यशस्विनी॥ १६२।●
तथापि नतु तत्याज जितराज्यस्य लालसाम्।
मोहान्मायामयीं राजा रामो हेमच्छगीमिव॥ १६३।
दूंलण्डे प्रेषितो दूत स्तेनास्मादेव कारणात्।
न दोषो डीडनस्यात्र हेतुर्नासीदयापरः॥ १६४।
साकं सावामराजेन ब्रिटनेशस्यासदाभवत्।
मैत्री ग्रातसवित्री हि भवसिन्धूद्भवरत्नवत्॥ १६५।
सालवीनसरित्तीर-विषयेषु चकार यः।
यातायाताव सर्व्वत्र नियुज्य शान्तिरक्षकान्॥ १६६।

Digitized by Google

दारुवाणिज्यकार्थार्थं मिरालवणिजासुत।
प्रतिरोधिजनासुष्ट-धनानां वर्त्म निर्भयम्॥ १६७।
धूर्तनस्तोपदेशेन फलमत्रान्वजायत।
केवलं मानिनश्चैतत् परदुःखोपतापिनः॥ १६८।

अभवद्दिङ्ग निकामं धर्म्म वैदेशकानां,
निजसतिकमनीयं प्रेत्य नित्योक्तमायम्।
धूर्तनविहित मित्यं तेऽय जैवात्तकत्वं,
व्यचलिषु रतिभक्त्या वेधसं तद्विधातुः॥ १६९।

इति श्रीमद्धिङ्गन-चरिते मन्त्रोपादिप्रवृत्ति नाम
पञ्चमः सर्गः।



षष्ठः सर्गः ।

प्रतीच्यसीम्नि चीनस्य पान्थेयाख्योपवर्त्तनम् ।
सुलतानसलिमानाख्यः सुमतिः क्षत्र भूपतिः ॥ १ ।
योऽष्टादशशतातीते खष्टाब्दे सोमसिन्धुमे ।
साम्राज्ये ब्रिटनेशस्यार्ब्बाः प्रशास्ते प्रैषिषत् किल ॥ २ ।
भ्रातुश्चुन्नस्य पुत्रस्य स्वकीयं दूतकर्म्मणे ।
प्रतिभान्वित मेकेन सार्द्धं विविधभाषिणा ॥ ३ । ●
भामोमोमिनयो मध्ये विनिर्म्मापयितुं खलु ।
वाणिज्यसुगमं वर्त्म तावावेदयतां तदा ॥ ४ ।
दूतौ प्रथमतो गत्वा रेङ्गूने तौ ततःपरम् ।
समेत्य कलिकाताया मिलखण्ड मभिनिर्गतौ ॥ ५ ।
अष्टर्त्तुमे खष्टवर्षे चाष्टादशशताग्विते ।
मेजरस्लेडनोपाधि खङ्गेतो मौमिने ययौ ॥ ६ ।
राज्ञोऽस्यदर्थकः शास्ता पान्थेयस्य तदातनः ।
अर्हणामातिथेयीञ्च प्रथमे स्लेडनस्य सः ॥ ७ ।
तद्दिष्टे विषये सम्यग् विधातुञ्च सुखावताम् ।
ससम्भ्रम मयो यः खं खयमभ्युपगच्छति ॥ ८ ।
प्रतीच्यचीनसाम्राज्य मधिकृत्य समाततम् ।
वणिज्यापथमाचेतु मिङ्गनेन मनाममा ॥ ९ ।
सूचना प्रथमादेव दत्ता लोकहितैषिणा ।
विहिते तु तदा यत्ने नात्र सिद्धिरजायत ॥ १० । ●

काले भाविनि निर्म्मिमं लोकै रिति च सत् फलम्।
सविता स्वत एवासौ तत्समीहावनस्पतिः॥ ११।
ब्रह्मराज्ये च विद्यन्ते विटनेयीविपालिते।
निषद्याः सुषमावर्य्याः सिन्धुरोधोगताः स्थिराः॥ १२।
वैदेहसुगमाः सर्व्या एताः सत्याकृताय हि।
यथा रत्नाचिताः साद्या-श्चित्रया सम्भेद्यभूमयः॥ १३।
ब्रह्मराज्यादिखण्डचीन-प्रदेशाभ्यन्तरे ननु।
प्रवेशाय द्वितीयोऽस्ति पन्थाः कश्चन निश्चितः॥ १४।
ऐरावत्याख्यया नद्या समतीत्यातिकष्टतः।
शतमानथ गव्यूतीन् शररत्नाकराधिकान्॥ १५।
क्रयविक्रयकार्य्यञ्च कर्त्तुं सर्व्वर्तुषूल्बणम्।
सन्तरिण्यन्ति वाष्पीय-पोतैः सांयात्रिकाः सदा। १६॥
ततः शोभनमेकन्तु नानापण्यसमन्वितम्।
स्थले भामोऽभिधे गत्वा वाणिज्यापणमाप्यते॥ १७।
सप्तरिण्यन्विता यस्य ननु गव्यूतयो ध्रुवम्।
दूरत्वं चीनसाम्राज्य-सीमात इति कथ्यते॥ १८।
चीनाधीशाश्रितः किन्तु शानराजो बलिप्रदः।
तदर्द्धमात्रं यद्राज्यं शायते विप्रलोष्टकम्॥ १९।
प्राक्तनो नव्यसौ पन्था निर्म्मितो न हि केनचित्।
वाणिज्यसुगमोऽविघ्नः सज्जनप्रसरोऽवरः॥ २०।
प्रतापै र्विटनेयार्य्याः शूरस्य खरतेजसः।
ततो दस्युभयं गीतं कूटान्तरतमो यथा॥ २१।
प्रयत्नै र्वणिजां तत्र राजकोषस्य संचयैः।
सनुव्रतीरादारभ्य भामोमण्डलयावधि॥ २२।

गत्वै वाष्णीयपोतानां सदुपायः समाहितः।
सत्यावृतस्य शुल्कस्य कृसिष्ठोऽजायत क्रमात् ॥ २३ ॥ ●
भामोयूनामयो मध्ये परं पान्थेयविश्रवात्।
शश्वद् वाणिज्यसौकर्यं तद् वरीवृध्यते घनैः ॥ २४ ॥
तयो भौमोऽभिधे नित्यं वाणिज्यनिलयाञ्चनु।
नैगमाः प्रतितिष्ठन्ति चीनरेङ्कूनदेशजाः ॥ २५ ॥
न लभ्यति पोतयानं न पुनर्ब्रह्मभूपतिः।
भामोमण्डलयाख्यान-स्थानयो मध्यतो ह्योः ॥ २६ ॥
अभितश्चीनसाम्राज्यं संयात्रासरणे रतः।
सुविश्रुतायाः संरक्षत्यै शुभयोगोऽयमागतः ॥ २७ ॥
वाष्णीयानोऽयनं कर्तुं रेङ्कूने वणिजां वरः।
विहितो विटनेभ्या यत् संकल्पः कुशलोत्तरः ॥ २८ ॥
अष्टादशशतातीते खष्टाब्देऽष्टर्तुसम्मिते।
स्वीयैः सहचरैः साकं विद्वान् स्वकृतितत्परः ॥ २९ ॥
विज्ञानविधिना ज्ञातुं भामोवाणिज्यवर्त्मनः।
मेजरस्लेडनस्तत्त्वं मोमिनेऽसौ गतस्ततः ॥ ३० ॥ ●
भविता न विना सिद्धिं व्रव्ययात्र कथञ्चन।
अर्हया धृतनावत्या विविदे स तदेति हिं ॥ ३१ ॥
जनानामभियातॄणां प्रत्यूहः पथि माऽभवत्।
धृत्यर्थो ब्रह्मराजेन सह सन्धिः कृतो नवः ॥ ३२ ॥
दुर्भगो मार्गरीनामा योऽत्र कर्म्मणि नोदितः।
परितः स परिभ्रम्य सततं रथनेमिवत् ॥ ३३ ॥
अष्टादशशतातीते खष्टीयाब्दे शराब्धिमे।
अथ भामोऽभिधे कट्टा-त्रिगमे समुपागमत् ॥ ३४ ॥ ●

अन्ये दृश्याविपर्य्यास स्तस्य कार्य्यञ्च निष्फलम् ।
सर्व्व एवेति आयन्ति प्रत्यर्थिप्रभवो यथा ॥ ३५ ।
भवितव्यञ्च संकल्पे विटनेष्यात्र सत्वरम् ।
उद्योगिन्या न विश्रम्भः पुन र्नः खलु तत्परम् ॥ ३६ ।
कालेन सरणिः सा तु प्रथिता क्रमशोऽयमा ।
भविता मति रेषा नो वैदेहप्रसरात्समा ॥ ३७ ।
दूरुह्यीनं ब्रह्मराज्य-स्थान्तरा सन्ति तद्दिना ।
बहूनि गूढवर्त्मानि सार्थवाहगमागमात् ॥ ३८ ।
मध्ये रेङ्खनसुस्त्रीन-नीहतो: स्तनयश्च याः ।
पुंलक्षणस्थानभं पक्षं ताभिरानीयतेऽत्र हि ॥ ३९ ।
विद्यते पद्धति र्यातु तङ्करेङ्खनयोजिका ।
अनसंस्करणार्थं हि न सा सम्पूर्णतामिता ॥ ४० ।
दूतनो यत्नवानासीदाधातुं तदखण्डताम् ।
विफलस्वस्य तर्षोऽभूदहो अनर्हितैषिणः ॥ ४१ ।
बान्धवो ब्रह्मराज्ये हि सत्यं सत्याकृतस्य सः ।
अभूद् भूतिभरारम्भ नयविन्धरनन्दनः ॥ ४२ ।
अन्तःसंस्करणं तेन तद्राज्यस्य महात्मना ।
यत् कल्याणकरं कृत्स्नं कृतमाख्यायतेऽत्र तत् ॥ ४३ ।
आराक्षानप्रदेशस्य दस्यूनां पर्व्वतौकसाम् ।
प्रथमात् प्रथमायैव प्रावर्त्तत परन्तपः ॥ ४४ ।
उपायै र्बहुभि र्निन्ये वश्यतामच्छदर्शकः ।
गच्छकौघानिवारण्यान् सोऽथ तान् खगस्य यथा ॥ ४५ ।
ब्रह्मदेशादतो यद्यो विटनेष्या च रक्षितात् ।
अनिष्टापतनत्रासं स्वयमेव तिरोदधे ॥ ४६ ।

प्रजाग्यान्तिकरो कीर्णा तत्र शासनपद्धतिः।
भव्यं भवति भूविष्ठं क्रमशः क्षत्रियोविनाम् ॥ ४७।
विद्यावेदविहीनानां जनानां शून्यचेतसाम्।
प्रोच्यते यच्छुभं तेन विक्षितं ब्रह्मवासिनाम् ॥ ४८।
हीनानां वा सच्छ्रानां राज्ञा पित्रेव सर्व्वदा।
कुल्यानां वा निहीनानां सर्व्वार्थसमदर्शिना ॥ ४९।
स्वप्रजाना मिवाज्ञानां प्रजानां कार्य्य आर्ज्जवात्।
विद्योपयोगः सर्व्वासां नेत्रयोगो यथाहयाम् ॥ ५०। ●
दूडनो दक्षिणः शान्तः सदा परहिते रतः।
शास्त्रज्ञानमयणी धीमानुदाराभा यशोऽन्वितः ॥ ५१।
लक्ष्यवर्णो विचिन्त्येति छात्रादिनिलयानसौ।
बहूनातिष्ठिपत्तत्र बालशिक्षणहेतुना ॥ ५२। ●
आदित स्तेन तद्देशे नीता कष्टेन भूयसा।
साक्षादिंलण्डजा विद्या साकारेव सरस्वती ॥ ५३।
स च देशजविद्यावाः शिक्षारीति मन्यूयुधत्।
प्रजाचारप्रेमवतां प्राज्ञनीं ब्रह्मवासिनाम् ॥ ५४।
स्त्रीणां सामाजिकं तत्र स्वातन्त्र्यं विद्यते परम्।
अध्यापन मनिर्व्वेद्यं चिराद् बौद्धमठेषु च ॥ ५५।
दृष्ट मेतद्धृदयं तेन राज्यस्य शुभलक्षणम्।
दूडे प्रत्युत्क्रमे यद्वदुदर्कं दैवयंसितम् ॥ ५६।
नवाचारापरज्ञानां प्रजानां भविष्योत्तरे।
द्वर्ण मलेति चित्रं सु स्नती स्नत्येऽभवत् स यत् ॥ ५७।
गता दूंराजसंसर्गाद् या स्नतो वरवर्णताम्।
यथा यकसचिक्रर्षाद् दिवि वेश्वाः परां गतिम् ॥ ५८।

विद्यालयेषु स्पष्टेषु राज्ये तत्रेडनेन च।
शिक्षातत्त्वावधानार्थं नियुक्ताः परिदर्शकाः॥ ५८।
विद्याभिज्ञां कारयितुं राजकोषव्ययेन सः।
बहुधा ताः प्रजाश्चैवं सदयः स्म समीक्षते॥ ५९।
नृणामनृतदृक्षीणां विदधे यन्त्रिताय सः।
श्रमो नैकसुखेनाह साक्षात्तं तत्त्ववासिनाम्॥ ६१।
निजस्वं ते भजन्तेऽथ राजस्व सुपदाव च।
राजन्वति सदा राज्ये नान्तरायोऽस्ति यत्र कः॥ ६२।
डडनेनैव सम्यक्त्वा राजनीतेः स्वकीयया।
सौराज्यं तत्र नान्येन युगं सत्यमिवाततम्॥ ६३।
अहो ग्रथत् स्तुत्वा विविध मिडनः सौम्यमूर्त्तिः,
सुधीः श्रेयो नृणां सदय धृति तद्देशजानाम्।
यदा प्रत्येत स्वे स्वसतिवशतो मेनिरे तं,
स ताम्रज्ञा वन्हीरिव गतघृणं स्नेहपाथैः॥ ६४।
तत उत गतखेदा क्रागुपालम्भतैतं,
भव विकरण नित्यं ब्रह्मदेशौकस स्वे।
प्रसृतिसमुदयानां प्रग्रहः प्रेमपत्त्ये,
स्वहसितगणिकावत् प्रैतु मा त्वाञ्च विष्वक्॥ ६५।

इति श्रीमद्डिडनचरिते ब्रह्मदेशावान्तरसत्कारो नाम
षष्ठः सर्गः।



सप्तमः सर्गः ।

अष्टादशशतातीते खष्टीवाब्दे शराब्धिमे ।
शासनं भारतराज्यस्य व्यवस्थापकसंसदि ॥ १ ।
सचिवोऽन्यतमो वर्ष्मो खर्डनर्थब्रुकेन सः ।
दूडनः सम्भृतः सौम्यो गुणपक्षावपातिना ॥ २ ।
सम्पादकपदे प्राप्य वङ्गराज्यस्य यः पुरा ।
प्रकृतीनां तु संरक्षा प्रपेदेऽभिरतां पराम् ॥ ३ ।
सामन्तराजराज्येषु गत्वा दूत्याय नित्यशः ।
राजनीतिज्ञता मिल्व मीलिता माप पुष्कलाम् ॥ ४ ।
विशालब्रह्मदेशस्य शासनस्य यथामुना ।
विहितं गुणवत्तायां मत्वा सचिवदर्शनम् ॥ ५ ।
इतः सोऽत्र पदे तर्हि सौभाग्याद् भारतौकसाम् ।
उच्चैरुद्घोषयन्तिस्म जोषं येऽथ अयं जनाः ॥ ६ ।
स्वतन्त्रः सन् सदा चक्रे सत्यं सदसि तत्र सः ।
शक्तः कर्तुं तथा नान्यः प्रजानां शुभसाधकम् ॥ ७ ।
ब्रह्मराज्यानुषङ्गीनि विधानान्यत्र यानि च ।
सितानि तानि तेनैव कृतानि समितौ तदा ॥ ८ ।
व्यधितेषामजानां स श्रेयांसि ब्रह्मवासिनाम् ।
सततं विप्रकृष्टोऽपि कङ्कारण्यं यथा विधुः ॥ ९ ।
अष्टादशशतातीते खष्टीवाब्दे रसाब्धिमे ।
फेब्रुयारीसमाख्याने द्वितीयेऽहनि मासि तु ॥ १० ।

Digitized by Google

परिहाय पदं तस्य तापोपतापपीडितः।
स्वास्थ्यमिषु मीसयेषे स्वदेशं समियाय सः॥ ११

वर्षे इतः स तत एत्य डिसेम्बराख्ये,
मासीच्च तत्र पणिने ननु वङ्गयास्तुः।
सामः पदे सततपर्व्वगतः प्रफुल्ल,
स्तेने यथा शुभकरः प्रमदं प्रजानाम्॥ १२।

दृष्ट्वाऽनिन्द्यं सदाहः सुचरित मिडनस्यैव सर्व्वं न जाने,
मुग्धं मुग्धः प्रकृत्या कविकुलगतया युज्यते का प्रशस्तिः।
मामज्जन्ते यथामी मधुकरनिकरा मोषणे माध्वकानां,
मध्वाधारे तथा मे गति रतिमुच्चदा कापि वाक्यातिरिक्ता॥ १३।

निखिलजननितोषणं हि वर्य्यं,
सुकृतिपरस्य वरस्य यस्य कार्य्यम्।
चत इति कृपया पिणाकपाणे-
र्भवतु भवेद्यभवस्य तस्य भव्यम्॥ १४।

इति श्रीमद्दिडन-चरिते वङ्गयास्तृसिंहासनाधिरोहणं नाम
सप्तमः सर्गः।

शिवमस्तु श्रीरस्तु॥



Digitized by Google

Digitized by Google

अशुद्धिशोधनपत्रम् ।

पत्रे	पङ्क्तौ	हेयः पाठः		ग्राह्यः पाठः ।
२य	६ष्ठ	दूयिवान्	...	ण्यिवान्
४र्थं	२३य	अवेतु	...	अवैतु
६ष्ठ	५म	वङ्करम्मुरे	..	वङ्करम्मुरे
८म	१म	विचारकैः	...	विचारकैः
१३य	२य	समावेतु	...	समावैतु
,,	१६य	त्यस्मुम्	...	त्यमुम्
१६य	११य	मिच्छं	....	मिच्छूं
१७य	४र्थं	नीतिज्ञो वावजानाति		नीतिज्ञः स्यावजानीते
,,	,,	निन्हति	....	कुत्सया
,,	५म	मासादितश्च	...	मासक्तुमेव
१८य	१४य	स्वत्व	...	स्वत्व
,,	२०य	किंवद्	...	कैश्चिद्
२२य	१५य	प्राप	...	प्राप्त
२७य	३य	बन्दिनां	...	बन्दीनां
२८य	१४य	वक्ष्यमाना	...	वक्ष्यमाणा
३१य	६ष्ठ	यथाविथि	...	यथाविधि
३२य	१८य	ममीदृशम्	...	मम्मूदृशम्
३३य	८म	जानन्ति स्म	...	समवैष्यन्
,,	११य	न कथं कुर्युः	...	किं नाकरिष्यन्
३५य	१२य	करया	...	क्रूरवा
४१य	२४य	निष्कति	...	निष्कृति
४४य	८म	मूर्द्धणि	...	मूर्द्धनि
,,	१५य	सन्दधे	....	सन्दधुः
४५य	२४य	*	...	§
५७म	२१य	दूतकृत्याद्यदर्थक:		दूतकर्माद्यदर्थक:
५८म	७म	माकरन्द	...	मारन्द

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

UNIVERSITY OF CHICAGO
24 096 075

PK 3799 Bhattacharyya,
.B52I2 Narayana Chandra,
1882 Kaviratna.
Iḍana-caritam :
a memoir of the
Honorable Sir
Ashley Eden,
K.C.S.I., C.I.E.,
Lieutenant-Gover-
nor of Bengal in
Se

0

PK 3799 Bhattacharyya,
.B52I2 Narayana Chandra,
1882 Kaviratna.
Iḍana-caritam :
a memoir of the
Honorable Sir
Ashley Eden,
K.C.S.I., C.I.E.,
Lieutenant-Gover-

THE UNIVERSITY OF CHICAGO LIBRARY

Digitized by Google

U of Chicago
24096075



Digitized by Google